# Devi Narayaniyam

# દેવીનારાયણીયમ્

## Document Information

Text title : Devi Narayaniyam

File name : devInArAyaNIyam.itx

Category : devii, devI

Location : doc_devii

Author : Prof. Paleli Narayanan Namboothiri

Transliterated by : Ganga Raamachandran geetanjaliglobalgurukulam at gmail

Proofread by : Ganga Raamachandran, PSA Easwaran

Latest update : September 25, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 6, 2022

*sanskritdocuments.org*

# દેવીનારાયણીયમ્

## અનુક્રમણિકા

દશકઃ

૧ પ્રથમદશકઃ - દેવીમહિમા

૨ દ્વિતીયદશકઃ - હયગ્રીવકથા

૩ તૃતીયદશકઃ - મહાકાલ્યવતારઃ

૪ ચતુર્થદશકઃ - મધુકૈટભવધઃ

૫ પઞ્ચમદશકઃ - સુદ્યુમ્નકથા

૬ ષષ્ઠદશકઃ - વ્યાસનારદસમાગમઃ

૭ સપ્તમદશકઃ - શુકોત્પત્તિઃ

૮ અષ્ટમદશકઃ - પરમજ્ઞાનોપદેશઃ

૯ નવમદશકઃ - ભુવનેશ્વરીદર્શનઃ

૧૦ દશમદશકઃ - શક્તિપ્રદાનમ્

૧૧ એકાદશદશકઃ - બ્રહ્મનારદસંવાદઃ

૧૨ દ્વાદશદશકઃ - ઉતથ્યજનનમ્

૧૩ ત્રયોદશદશકઃ - ઉતથ્યમહિમા

૧૪ ચતુર્દશદશકઃ - સુદર્શનકથા - ભરદ્વાજાશ્રમપ્રવેશમ્

૧૫ પઞ્ચદશદશકઃ - સુદર્શનકથા - દેવીદર્શનમ્

૧૬ ષોડશદશકઃ - સુદર્શનવિવાહમ્

૧૭ સપ્તદશદશકઃ - સુદર્શનકોસલપ્રાપ્તિઃ

૧૮ અષ્ટાદશદશકઃ - રામકથા

૧૯ એકોનવિંશદશકઃ - ભૂમ્યાઃ દુઃખમ્ ૧

૨૦ વિંશદશકઃ - દેવકીપુત્રવધં

૨૧ એકવિંશદશકઃ - નન્દસુતાવતારઃ

૨૨ દ્વાવિંશદશકઃ - કૃષ્ણકથા

૨૩ ત્રયોવિંશદશકઃ - મહાલક્ષ્મ્યવતારઃ

૨૪ ચતુર્વિંશદશકઃ - મહિષાસુરવધમ્ - દેવીસ્તુતિઃ
૨૫ પઞ્ચવિંશદશકઃ - મહાસરસ્વત્યવતારઃ
૨૬ ષડ્વિંશદશકઃ - સુરથકથા
૨૭ સપ્તવિંશદશકઃ - શતાક્ષ્યવતારઃ
૨૮ અષ્ટાવિંશદશકઃ - શક્ત્યવમાનદોષઃ
૨૯ એકોનત્રિંશદશકઃ - દેવીપીઠોત્પત્તિઃ
૩૦ ત્રિંશદશકઃ - શ્રીપાર્વત્યવતારઃ
૩૧ એકત્રિંશદશકઃ - ભ્રામર્યવતારઃ
૩૨ દ્વાત્રિંશદશકઃ - યક્ષકથા
૩૩ ત્રયસ્ત્રિંશદશકઃ - ગૌતમકથા
૩૪ ચતુસ્ત્રિંશદશકઃ - ગૌતમશાપઃ
૩૫ પઞ્ચત્રિંશદશકઃ - અનુગ્રહવૈચિત્ર્યમ્
૩૬ ષટ્ત્રિંશદશકઃ - મૂલપ્રકૃતિમહિમા
૩૭ સપ્તત્રિંશદશકઃ - વિષ્ણુમહત્ત્વમ્
૩૮ અષ્ટાત્રિંશદશકઃ - ચિત્તશુદ્ધિપ્રાધાન્યમ્
૩૯ એકોનચત્વારિંશદશકઃ - મણિદ્વીપનિવાસિની
૪૦ ચત્વારિંશદશકઃ - પ્રાર્થના
૪૧ એકચત્વારિંશદશકઃ - પ્રણામમ્

## ૧ પ્રથમદશકઃ - દેવીમહિમા

યસ્મિન્નિદં યત ઇદં યદિદં યદસ્માત્
    ઉત્તીર્ણરૂપમભિપશ્યતિ યત્સમસ્તમ્ ।
નો દૃશ્યતે ચ વચસાં મનસશ્ચ દૂરે
    યદ્ભાતિ ચાદિમહસે પ્રણમામિ તસ્મૈ ॥ ૧-૧॥

ન સ્ત્રી પુમાન્ ન સુરદૈત્યનરાદયો ન
    ક્લીબં ન ભૂતમપિ કર્મગુણાદયશ્ચ ।
ભૂમંસ્ત્વમેવ સદનાદ્યવિકાર્યનન્તં
    સર્વં ત્વયા જગદિદં વિતતં વિભાતિ ॥ ૧-૨॥

રૂપં ન તેઽપિ બહુરૂપભૃદાત્તશક્તિ-
    ર્નાટ્યં તનોષિ નટવત્ખલુ વિશ્વરઙ્ગે ।
વર્ષાણિ તે સરસનાટ્યકલાવિલીના

ભક્તા અહો સહૃદયા ક્ષણવન્નયન્તિ ॥ ૧-૩॥

રૂપાનુસારિ ખલુ નામ તતો બુધૈસ્ત્વં
દેવીતિ દેવ ઇતિ ચાસિ નિગદ્યમાના ।
દેવ્યાં ત્વયીર્યસ ઉમા કમલાઽથ વાગ્ વા
દેવે તુ ષણ્મુખ ઉમાપતિરચ્યુતો વા ॥ ૧-૪॥

ત્વં બ્રહ્મ શક્તિરપિ ધાતૃરમેશરુદ્રૈઃ
બ્રહ્માણ્ડસર્ગપરિપાલનસંહૃતીશ્ચ ।
રાજ્ઞીવ કારયસિ સુભ્રુ નિજાજ્ઞયૈવ
ભક્તેષ્વનન્યશરણેષુ કૃપાવતી ચ ॥ ૧-૫॥

માતા કરોતિ તનયસ્ય કૃતે શુભાનિ
કર્માણિ તસ્ય પતને ભૃશમેતિ દુઃખમ્ ।
વૃદ્ધૌ સુખં ચ તવ કર્મ ન નાપિ દુઃખં
ત્વં હ્યેવ કર્મફલદા જગતાં વિધાત્રી ॥ ૧-૬॥

સર્વત્ર વર્ષસિ દયામત એવ વૃષ્ટ્યા
સિક્તઃ સુબીજ ઇવ વૃદ્ધિમુપૈતિ ભક્તઃ ।
દુર્બીજવદ્વ્રજતિ નાશમભક્ત એવ
ત્વં નિર્ઘૃણા ન વિષમા ન ચ લોકમાતઃ ॥ ૧-૭॥

સર્વોપરીશ્વરિ વિભાતિ સુધાસમુદ્ર-
સ્તન્મધ્યતઃ પરિવૃતે વિવિધૈઃ સુદુર્ગૈઃ ।
છત્રાયિતે ત્રિજગતાં ભવતી મણિદ્વી-
પાખ્યે શિવે નિજપદે હસિતાનનાઽઽસ્તે ॥ ૧-૮॥

યસ્તે પુમાનભિદધાતિ મહત્ત્વમુચ્ચૈ-
ર્યો નામ ગાયતિ શ‍ૃણોતિ ચ તે વિલજ્જઃ ।
યશ્ચાતનોતિ ભૃશમાત્મનિવેદનં તે
સ સ્વાન્યઘાનિ વિધુનોતિ યથા તમોઽર્કઃ ॥ ૧-૯॥

ત્વાં નિર્ગુણાં ચ સગુણાં ચ પુમાન્ વિરક્તો
જાનાતિ કિઞ્ચિદપિ નો વિષયેષુ સક્તઃ ।
જ્ઞેયા ભવ ત્વમિહ મે ભવતાપહન્ત્રીં
ભક્તિં દદસ્વ વરદે પરિપાહિ માં ત્વમ્ ॥ ૧-૧૦॥

## ૨ દ્વિતીયદશકઃ - હયગ્રીવકથા

રણેષુ દૈત્યેષુ હતેષુ દેવાઃ પુરા પ્રહૃષ્ટાઃ સહદાતૃશર્વાઃ ।
યિયક્ષવો યજ્ઞપતિં વિનીતાઃ પ્રપેદિરે વિષ્ણુમનન્તવીર્યમ્ ॥ ૨-૧॥

દૃષ્ટ્વા ચ નિદ્રાવશગં પ્રભું તમધિજ્યચાપાગ્રસમર્પિતાસ્યમ્ ।
આશ્ચર્યમાપુર્વિબુધા ન કોઽપિ પ્રાબોધયત્તં ખલુ પાપભીત્યા ॥ ૨-૨॥

હરેસ્તદાનીમજસૃષ્ટવમ્ર્યા મુખાર્પણાકુઞ્ચિતચાપમૌર્વી ।
ભગ્ના ધનુશ્ચાર્જવમાપ સદ્યસ્તેનાભવત્સોઽપિ નિકૃત્તકણ્ઠઃ ॥ ૨-૩॥

કાયાચ્છિરસ્તૂત્પતિતં મુરારેઃ પશ્યત્સુ દેવેષુ પપાત સિન્ધૌ ।
ચેતઃ સુરાણાં કદને નિમગ્નં હાહેતિ શબ્દઃ સુમહાનભૂચ્ચ ॥ ૨-૪॥

કિમત્ર કૃત્યં પતિતે હરૌ નઃ કુર્મઃ કથં વેતિ મિથો બ્રુવાણાન્ ।
દેવાન્ વિધાતાઽઽહ ભવેન્ન કાર્યમકારણં દૈવમહો બલીયઃ ॥ ૨-૫॥

ધ્યાયેત દેવીં કરુણાર્દ્રચિત્તાં બ્રહ્માણ્ડસૃષ્ટ્યાદિકહેતુભૂતામ્ ।
સર્વાણિ કાર્યાણિ વિધાસ્યતે નઃ સા સર્વશક્તા સગુણાઽગુણા ચ ॥ ૨-૬॥

ઇત્યૂચુષઃ પ્રેરણયા વિધાતુસ્ત્વામેવ વેદા નુનુવુઃ સુરાશ્ચ ।
દિવિ સ્થિતા દેવગણાંસ્ત્વમાત્થ ભદ્રં ભવેદ્વો હરિણેદૃશેન ॥ ૨-૭॥

દૈત્યો હયગ્રીવ ઇતિ પ્રસિદ્ધો મયૈવ દત્તેન વરેણ વીરઃ ।
વેદાન્ મુનીંશ્ચાપિ હયાસ્યમાત્રવધ્યો ભૃશં પીડયતિ પ્રભાવાત્ ॥ ૨-૮॥

દૈવેન કૃત્તં હરિશીર્ષમદ્ય સંયોજ્યતાં વાજિશિરોઽસ્ય કાયે ।
તતો હયગ્રીવતયા મુરારિર્દૈત્યં હયગ્રીવમરં નિહન્તા ॥ ૨-૯॥

ત્વમેવમુક્ત્વા સદયં તિરોધાસ્ત્વષ્ટ્રા કબન્ધેઽશ્વશિરો મુરારેઃ ।
સંયોજિતં પશ્યતિ દેવસઙ્ઘે હયાનનઃ શ્રીહરિરુત્થિતોઽભૂત્ ॥ ૨-૧૦॥

દૈત્યં હયગ્રીવમહન્ હયાસ્યો રણે મુરારિસ્ત્વદનુગ્રહેણ ।
સદા જગન્મઙ્ગલદે ત્વદીયાઃ પતન્તુ મે મૂર્ધ્નિ કૃપાકટાક્ષાઃ ॥ ૨-૧૧॥

## 3 તૃતીયદશકઃ - મહાકાલ્યવતારઃ

જગત્સુ સર્વેષુ પુરા વિલીનેષ્વેકાર્ણવે શેષતનૌ પ્રસુપ્તે ।

હરૌ સુરારી મધુકૈટભાખ્યૌ મહાબલાવપ્સુ વિજહ્રતુર્દ્રૌ ॥ ૩-૧॥

સમાઃ સહસ્રં યતચિત્તવૃત્તી વાગ્બીજમન્ત્રં વરદે જપન્તૌ ।
પ્રસાદિતાયા અસુરૌ ભવત્યાઃ સ્વચ્છન્દમૃત્યુત્વમવાપતુસ્તૌ ॥ ૩-૨॥

એકામ્બુધૌ તૌ તરલોર્મિમાલે નિમજ્જનોન્મજ્જનકેલિલોલૌ ।
યદૃચ્છયા વીક્ષિતમબ્જયોનિં રણોત્સુકાવૂચતુરિદ્ધગર્વૌ ॥ ૩-૩॥

પદ્માસનં વીરવરોપભોગ્યં ન ભીરુભોગ્યં ન વરાકભોગ્યમ્ ।
મુઞ્ચેદમદ્યૈવ ન યાસિ ચેત્ત્વં પ્રદર્શય સ્વં યુધિ શૌર્યવત્ત્વમ્ ॥ ૩-૪॥

ઇદં સમાકર્ણ્ય ભયાદ્વિરિઞ્ચઃ સુષુપ્તિનિષ્પન્દમમોઘશક્તિમ્ ।
પ્રબોધનાર્થં હરિમિદ્ધભક્ત્યા તુષ્ટાવ નૈવાચલદમ્બુજાક્ષઃ ॥ ૩-૫॥

અસ્પન્દતા ત્વસ્ય કયાપિ શક્ત્યા કૃતેતિ મત્વા મતિમાન્ વિરિઞ્ચઃ ।
પ્રબોધયૈનં હરિમેવમુક્ત્વા સ્તોત્રૈર્વિચિત્રૈર્ભવતીમનૌષીત્ ॥ ૩-૬॥

નુતિપ્રસન્નાઽબ્જભવસ્ય તૂર્ણં નિઃસૃત્ય વિષ્ણોઃ સકલાઙ્ગતસ્ત્વમ્ ।
દિવિ સ્થિતા તત્ક્ષણમેવ દેવો નિદ્રાવિમુક્તો હરિરુત્થિતોઽભૂત્ ॥ ૩-૭॥

અથૈષ ભીતં મધુકૈટભાભ્યાં વિરિઞ્ચમાલોક્ય હરિર્જગાદ ।
અલં ભયેનાહમિમૌ સુરારી હન્તાસ્મિ શીઘ્રં સમરેઽત્ર પશ્ય ॥ ૩-૮॥

એવં હરૌ વક્તરિ તત્ર દૈત્યૌ રણોત્સુકૌ પ્રાપતુરિદ્ધગર્વૌ ।
તયોરવિજ્ઞાય બલં મુરારિર્યુદ્ધોદ્યતોઽભૂદજરક્ષણાર્થમ્ ॥ ૩-૯॥

બિભેમિ રાગાદિમહારિપુભ્યો જેતું યતિષ્યેઽહમિમાન્ સુશક્તાન્ ।
તદર્થશક્તિં મમ દેહિ નિત્યં નિદ્રાલસો મા ચ ભવાનિ માતઃ ॥ ૩-૧૦॥

## ૪ ચતુર્થદશકઃ - મધુકૈટભવધઃ

ત્વં તામસી સુપ્તરમાધવાઙ્ગજા શ્યામા રુચા મોહનતામ્રલોચના ।
એકાર્ણવે ઘોરરણોત્સુકાન્ હરિં દૈત્યૌ ચ તૌ સ્મેરમુખી સમૈક્ષથાઃ ॥ ૪-૧॥

પશ્યત્યજે બાહુરણં મુરારિણા કૃત્વા મધુઃ શ્રાન્તિમવાપ સત્વરમ્ ।
અભ્યેત્ય યુદ્ધં કુરુતે સ્મ કૈટભઃ શ્રાન્તે ચ તસ્મિન્નકૃતાહવં મધુઃ ॥ ૪-૨॥

એવં મુહુઃ સઙ્ગરવિશ્રમાવુભૌ પર્યાયતો વર્ષસહસ્રપઞ્ચકમ્ ।
ગ્લાનિં વિના ચક્રતુરચ્યુતઃ ક્લમાદ્વિશ્રાન્તિમિચ્છન્નસુરૌ જગાદ તૌ ॥ ૪-૩॥

શ્રાન્તેન ભીતેન ચ બાલકેન ચ પ્રભુઃ પુમાન્નૈવ કરોતિ સંયુગમ્ ।
મધ્યેરણં દ્વૌ કૃતવિશ્રમૌ યુવામેકઃ કરોમ્યેવ નિરન્તરાહવમ્ ॥ ૪-૪॥

જ્ઞાત્વા હરિં શ્રાન્તમુભૌ વિદૂરતઃ સન્તસ્થતુર્વિશ્રમસૌખ્યવાંસ્તતઃ ।
ત્વામેવ તુષ્ટાવ કૃપાતરઙ્ગિણીં સર્વેશ્વરીં દૈત્યજયાય માધવઃ ॥ ૪-૫॥

દેવિ પ્રસીદૈષ રણે જિતોઽસ્મ્યહં દૈત્યદ્વયેનાબ્જભવં જિઘાંસુના ।
સર્વં કટાક્ષૈસ્તવ સાધ્યમત્ર માં રક્ષેતિ વક્તારમભાષથા હરિમ્ ॥ ૪-૬॥

યુદ્ધં કુરુ ત્વં જહિ તૌ મયા ભૃશં સમ્મોહિતૌ વક્રદૃશેત્યયં ત્વયા ।
સઞ્ચોદિતો હૃષ્ટમના મહાર્ણવે તસ્થૌ રણાયાયયતુશ્ચ દાનવૌ ॥ ૪-૭॥

ભૂયોઽપિ કુર્વન્ રણમચ્યુતો હસન્ કામાતુરૌ તે મુખપદ્મદર્શનાત્ ।
તાવાહ તુષ્ટોઽસ્મ્યતુલૌ રણે યુવાં દદામ્યહં વાં વરમેષ વાઞ્છિતમ્ ॥ ૪-૮॥

તાવૂચતુર્વિદ્ધિ હરે ન યાચકાવાવાં દદાવસ્તવ વાઞ્છિતં વરમ્ ।
નાસત્યવાચૌ સ્વ ઇતીરિતો હરિસ્ત્વાં સંસ્મરન્ શત્રુજિગીષયાઽબ્રવીત્ ॥ ૪-૯॥

મહ્યં વરં યચ્છતમદ્ય મે યતો વધ્યૌ યુવાં સ્યાતમિતીરિતાવુભૌ ।
દૃષ્ટ્વાઽપ્સુ લીનં સકલં સમૂચતુસ્ત્વં સત્યવાઙ્નૌ જહિ નિર્જલે સ્થલે ॥ ૪-૧૦॥

અસ્ત્વેવમિત્યાદૃતવાઙ્મુદા હરિઃ સ્વોરૌ પૃથાવુન્નમિતે જલોપરિ ।
કૃત્વાઽરિણા તચ્છિરસી તદાઽચ્છિનત્સ્વચ્છન્દમૃત્યૂ તવ માયયા હતૌ ॥ ૪-૧૧॥

દ્વેષશ્ચ રાગશ્ચ સદા મમામ્બિકે દૈત્યૌ હૃદિ સ્તોઽત્ર વિવેકમાધવઃ ।
આભ્યાં કરોત્યેવ રણં જયત્વયં તુભ્યં મહાકાલિ નમઃ પ્રસીદ મે ॥ ૪-૧૨॥

## ૫ પઞ્ચમદશકઃ - સુદ્યુમ્નકથા

જાતા સુતેલા મનુસત્તમસ્ય સંપ્રાર્થિતોઽનેન મુનિર્વસિષ્ઠઃ ।
શમ્ભોઃ કટાક્ષેણ સુતાં કુમારં ચક્રે સ કાલેન બભૂવ રાજા ॥ ૫-૧॥

સુદ્યુમ્નનામા મૃગયાવિહારી ગતો હયારૂઢ ઇલાવૃતં સઃ ।
સ્ત્રીત્વં પુનઃ પ્રાપ્ય સુતં હિમાંશોર્વવ્રે પતિં પુત્રમસૂત ચૈષા ॥ ૫-૨॥

ન્યવેદયત્સા ગુરવે વસિષ્ઠાયૈષા કદાચિન્નિજપુંસ્ત્વકામમ્ ।
તત્સાધનાર્થં હરમેવ દધ્યૌ મુનિઃ પ્રસન્નસ્તમુવાચ શમ્ભુઃ ॥ ૫-૩॥

ઇલાવૃતં મા પુરુષઃ પ્રયાતુ પ્રયાતિ ચેત્સોઽસ્ત્વબલા તદૈવ ।
એવં મયા નિશ્ચિતમેવ સૌમ્ય ગૌર્યાઃ પ્રસાદાય ભવાન્ પ્રિયો મે ॥ ૫-૪॥

ન પક્ષભેદોઽત્ર મમાસ્તિ ગૌરી ભવાંશ્ચ તૃપ્તૌ ભવતાં મદીયૌ ।
ઇતઃ પરં તસ્ય મનોરપત્યં માસં પુમાન્ સ્યાદ્વનિતા ચ માસમ્ ॥ ૫-૫॥

એવં શિવોક્તેન મનોરપત્યં લબ્ધ્વા ચ પુંસ્ત્વં ધરણીં શશાસ ।
સ્ત્રીત્વે ચ હર્મ્યેષુ નિનાય કાલં જનો ન ચૈનં નૃપમભ્યનન્દત્ ॥ ૫-૬॥

પુરૂરવસ્યાત્મસુતેઽર્પયિત્વા રાજ્યં વિરક્તો વનમેત્ય ભૂપઃ ।
શ્રીનારદાલ્લબ્ધનવાર્ણમન્ત્રો ભક્ત્યા સ દધ્યૌ ભવતારિણીં ત્વામ્ ॥ ૫-૭॥

સિંહાધિરૂઢામરુણાબ્જનેત્રાં ત્વાં સુપ્રસન્નામભિવીક્ષ્ય નત્વા ।
સ્તુત્વા ચ ભક્ત્યા સ્થિરપુંસ્ત્વમેષ લેભેઽથ સાયુજ્યમવાપ ચાન્તે ॥ ૫-૮॥

શૌર્યં ન વીર્યં ન ચ પૌરુષં મે નૈવાસ્તિ ચ સ્ત્રીસહજા તિતિક્ષા ।
મૂઢો ન જાનામ્યશુભં શુભં ચ દેયં ત્વયા મે શુભમેવ માતઃ ॥ ૫-૯॥

પશ્યાનિ માતઃ પ્રવરાન્ગુરૂંસ્તે કારુણ્યતો માં સુપથા નયન્તુ ।
સત્સઙ્ગસમ્ભાવિતચિત્તવૃત્તિર્ભવાનિ તે દેવિ નમઃ પ્રસીદ ॥ ૫-૧૦॥

## ૬ ષષ્ઠદશકઃ - વ્યાસનારદસમાગમઃ

ત્વદિચ્છયા દેવિ પુલસ્ત્યવાચા પરાશરાદ્વિષ્ણુપુરાણકર્તુઃ ।
મુનેર્હરિર્લોકહિતાય દીપાદ્યથા પ્રદીપોઽજનિ કૃષ્ણનામા ॥ ૬-૧॥

વેદં ચતુર્ધા વ્યદધત્સ કૃષ્ણદ્વૈપાયનો વ્યાસ ઇતિ પ્રસિદ્ધઃ ।
વેદાન્તસૂત્રાણિ પુરાણજાલં મહેતિહાસં ચ મહાંશ્ચકાર ॥ ૬-૨॥

તપઃ પ્રવૃત્તઃ કલવિઙ્કપોતં માત્રા સ સંલાલિતમાશ્રમાન્તે ।
પશ્યન્નધન્યામનપત્યતાં સ્વાં સપુત્રભાગ્યાતિશયં ચ દધ્યૌ ॥ ૬-૩॥

સત્પુત્રલાભાય તપશ્ચિકીર્ષુસ્તીવ્રં મહામેરુસમીપમેત્ય ।
આરાધનીયઃ ક ઇતિ ક્ષણં સ ચિન્તાઽઽતુરો લોકગુરુઃ સ્થિતોઽભૂત્ ॥ ૬-૪॥

શ્રીનારદસ્તત્ર સમાગતસ્ત્વત્કૃપાકટાક્ષાઙ્કુરવન્મહર્ષિઃ ।
અર્ઘ્યાદિસમ્પૂજિત આસનસ્થો વ્યાસેન પૃષ્ટઃ પ્રહસન્નિવાહ ॥ ૬-૫॥

કિં ચિન્તયા કૃષ્ણ ભજસ્વ દેવીં કૃપાવતી વાઞ્છિતદાનદક્ષા ।
અહેતુરેષા ખલુ સર્વહેતુર્નિરસ્તસામ્યાતિશયા નિરીહા ॥ ૬-૬॥

સૈષા મહાશક્તિરિતિ પ્રસિદ્ધા યદાજ્ઞયા બ્રહ્મરમેશરુદ્રાઃ ।

બ્રહ્માણ્ડસર્ગસ્થિતિસંહૃતીશ્ચ કુર્વન્તિ કાલે ન ચ તે સ્વતન્ત્રાઃ ॥ ૬-૭॥

યસ્યાશ્ચ તે શક્તિભિરેવ સર્વકર્માણિ કુર્વન્તિ સુરાસુરાદ્યાઃ ।
મર્ત્યા મૃગાઃ કૃષ્ણ પતત્રિણશ્ચ શક્તેર્વિધેયાઃ ક ઇહાવિધેયઃ ॥ ૬-૮॥

પ્રત્યક્ષમુખ્યૈર્ન ચ સા પ્રમાણૈર્જ્ઞેયા તપોભિઃ કઠિનૈર્વ્રતૈશ્ચ ।
ન વેદશાસ્ત્રાધ્યયનેન ચાપિ ભક્ત્યૈવ જાનાતિ પુમાન્ મહેશીમ્ ॥ ૬-૯॥

તામેવ ભક્ત્યા સતતં ભજસ્વ સર્વાર્થદાં કૃષ્ણ તવાસ્તુ ભદ્રમ્ ।
ઇત્યૂચુષિ બ્રહ્મસુતે ગતે સ વ્યાસસ્તપોઽર્થં ગિરિમારુરોહ ॥ ૬-૧૦॥

ઇહાસ્મિ પર્યાકુલચિત્તવૃત્તિર્ગુરું ન પશ્યામિ મહત્તમં ચ ।
સન્માર્ગતો માં નય વિશ્વમાતઃ પ્રસીદ મે ત્વાં શરણં વ્રજામિ ॥ ૬-૧૧॥

## ૭ સપ્તમદશકઃ - શુકોત્પત્તિઃ

કૃષ્ણસ્ય તસ્યારણિતઃ શુકાખ્યસ્તવ પ્રસાદાદજનિષ્ટ પુત્રઃ ।
હૃષ્ટો મુનિર્મઙ્ગલકર્મ ચક્રે તત્રાદિતેયા વવૃષુઃ સુમાનિ ॥ ૭-૧॥

કેચિજ્જગુઃ કેચન વાદ્યઘોષં ચક્રુશ્ચ નાકે નનૃતુઃ સ્ત્રિયશ્ચ ।
વાયુર્વવૌ સ્પર્શસુખઃ સુગન્ધઃ શુકોદ્ભવે સર્વજનાઃ પ્રહૃષ્ટાઃ ॥ ૭-૨॥

બાલઃ સ સદ્યો વવૃધે સુચેતાઃ બૃહસ્પતેરાત્તસમસ્તવિદ્યઃ ।
દત્વા વિનીતો ગુરુદક્ષિણાં ચ પ્રત્યાગતો હર્ષયતિ સ્મ તાતમ્ ॥ ૭-૩॥

યુવાનમેકાન્તતપઃપ્રવૃત્તં વ્યાસઃ કદાચિચ્છુકમેવમૂચે ।
વેદાંશ્ચ શાસ્ત્રાણિ ચ વેત્સિ પુત્ર કૃત્વા વિવાહં ભવ સદ્ગૃહસ્થઃ ॥ ૭-૪॥

સર્વાશ્રમાણાં કવયો વિશિષ્ટા ગૃહાશ્રમં શ્રેષ્ઠતરં વદન્તિ ।
તમાશ્રિતસ્તિષ્ઠતિ લોક એષ યજસ્વ દેવાન્ વિધિવત્પિતૄંશ્ચ ॥ ૭-૫॥

તવાસ્તુ સત્પુત્ર ઋણાદહં ચ મુચ્યેય માં ત્વં સુખિનં કુરુષ્વ ।
પુત્રઃ સુખાયાત્ર પરત્ર ચ સ્યાત્ત્વાં પુત્ર તીવ્રૈરલભે તપોભિઃ ॥ ૭-૬॥

કિઞ્ચ પ્રમાથીનિ સદેન્દ્રિયાણિ હરન્તિ ચિત્તં પ્રસભં નરસ્ય ।
પશ્યન્ પિતા મે જનનીં તપસ્વી પરાશરોઽપિ સ્મરમોહિતોઽભૂત્ ॥ ૭-૭॥

ય આશ્રમાદાશ્રમમેતિ તત્તત્કર્માણિ કુર્વન્ સ સુખી સદા સ્યાત્ ।
ગૃહાશ્રમો નૈવ ચ બન્ધહેતુસ્ત્વયા ચ ધીમન્ ક્રિયતાં વિવાહઃ ॥ ૭-૮॥

એવં બ્રુવાણોઽપિ શુકં વિવાહાદ્યસક્તમાજ્ઞાય પિતેવ રાગી ।
પુરાણકર્ત્તા ચ જગદ્ગુરુઃ સ માયાનિમગ્નોઽશ્રુવિલોચનોઽભૂત્ ॥ ૭-૯॥

ભોગેષુ મે નિસ્પૃહતાઽસ્તુ માતઃ પ્રલોભિતો મા કરવાણિ પાપમ્ ।
મા બાધતાં માં તવ દેવિ માયા માયાધિનાથે સતતં નમસ્તે ॥ ૭-૧૦॥

## ૮ અષ્ટમદશકઃ - પરમજ્ઞાનોપદેશઃ

અથાહ કૃષ્ણઃ શ‍ૃણુ ચિન્તયાઽલં ગૃહાશ્રમસ્તે ન ચ બન્ધકૃત્સ્યાત્ ।
બન્ધસ્ય મુક્તેશ્ચ મનો હિ હેતુર્મનોજયાર્થં ભજ વિશ્વધાત્રીમ્ ॥ ૮-૧॥

યસ્યાઃ પ્રસાદે સફલં સમસ્તં યદપ્રસાદે વિફલં સમસ્તમ્ ।
માહાત્મ્યમસ્યા વિદિતં જગત્સુ મયા કૃતં ભાગવતં શ‍ૃણુ ત્વમ્ ॥ ૮-૨॥

વિષ્ણુર્જગત્યેકસમુદ્રલીને બાલઃ શયાનો વટપત્ર એકઃ ।
સ્વબાલતાહેતુવિચારમગ્નઃ શુશ્રાવ કામપ્યશરીરિવાચમ્ ॥ ૮-૩॥

સનાતનં સત્યમહં મદન્યત્સત્યં ન ચ સ્યાદહમેવ સર્વમ્ ।
શ્રુત્વેદમુન્મીલિતદૃષ્ટિરેષ સ્મિતાનનાં ત્વાં જનનીં દદર્શ ॥ ૮-૪॥

ચતુર્ભુજા શઙ્ખગદારિપદ્મધરા કૃપાર્દ્રૈઃ સહ શક્તિજાલૈઃ ।
સ્થિતા જલોપર્યમલામ્બરા ત્વં પ્રહૃષ્ટચિત્તં હરિમેવમાત્થ ॥ ૮-૫॥

કિં વિસ્મયેનાચ્યુત વિસ્મૃતાઽહં ત્વયા પરાશક્તિમહાપ્રભાવાત્ ।
સા નિર્ગુણા વાઙ્મનસોરગમ્યા માં સાત્વિકીં શક્તિમવેહિ લક્ષ્મીમ્ ॥ ૮-૬॥

શ્રુતસ્ત્વયા યસ્ત્વશરીરિશબ્દો હિતાય તે દેવ તયા સ ઉક્તઃ ।
અયં હિ સર્વશ્રુતિશાસ્ત્રસારો મા વિસ્મરેમં હૃદિ રક્ષણીયમ્ ॥ ૮-૭॥

નાતઃ પરં જ્ઞેયમવેહિ કિઞ્ચિત્પ્રિયોઽસિ દેવ્યાઃ શ‍ૃણુ મે વચસ્ત્વમ્ ।
ત્વન્નાભિપદ્માદ્દ્રુહિણો ભવેત્સ કર્તા જગત્પાલય તત્સમસ્તમ્ ॥ ૮-૮॥

ભ્રૂમધ્યતઃ પદ્મભવસ્ય કોપાદ્રુદ્રો ભવિષ્યન્ સકલં હરેચ્ચ ।
દેવીં સદા સંસ્મર તેઽસ્તુ ભદ્રમેવં નિગદ્યાશુ તિરોદધાથ ॥ ૮-૯॥

હરેરિદં જ્ઞાનમજસ્ય લબ્ધમજાત્સુરર્ષેશ્ચ તતો મમાપિ ।
મયા ત્વિદં વિસ્તરતઃ સુતોક્તં યત્સૂરયો ભાગવતં વદન્તિ ॥ ૮-૧૦॥

દેવ્યા મહત્ત્વં ખલુ વર્ણ્યતેઽત્ર યદ્ભક્તિમાપ્તસ્ય ગૃહે ન બન્ધઃ ।
યદ્ભક્તિહીનસ્ત્વગૃહેઽપિ બદ્ધો રાજાઽપિ મુક્તો જનકો ગૃહસ્થઃ ॥ ૮-૧૧॥

વિદેહરાજં તમવાપ્ય પૃષ્ટ્વા સ્વધર્મશઙ્કાઃ પરિહૃત્ય ધીરઃ ।
ફલેષ્વસક્તઃ કુરુ કર્મ તેન કર્મક્ષયઃ સ્યાત્તવ ભદ્રમસ્તુ ॥ ૮-૧૨॥

શ્રુત્વેતિ સદ્યઃ શુક આશ્રમાત્સ પ્રસ્થાય વૈદેહપુરં સમેત્ય ।
પ્રત્યુદ્ગતઃ સર્વજનૈર્નૃપાય ન્યવેદયત્સ્વાગમનસ્ય હેતુમ્ ॥ ૮-૧૩॥

ગૃહસ્થધર્મસ્ય મહત્ત્વમસ્માદ્વિજ્ઞાય ધીમાન્ સ શુકો નિવૃત્તઃ ।
પિત્રાશ્રમં પ્રાપ્ય સુતાં પિતૃણાં વ્યાસેઽતિહૃષ્ટે ગૃહિણીં ચકાર ॥ ૮-૧૪॥

ઉત્પાદ્ય પુત્રાંશ્ચતુરઃ સુતાં ચ ગૃહસ્થધર્માન્ વિધિનાઽઽચરન્ સઃ ।
પ્રદાય ચૈનાં મુનયેઽણુહાય બભૂવ કાલે કૃતસર્વકૃત્યઃ ॥ ૮-૧૫॥

હિત્વાઽઽશ્રમં તાતમપીશશૈલશૃઙ્ગે તપસ્વી સહસોત્પતન્ ખે ।
બભૌ સ ભાસ્વાનિવ તદ્વિયોગખિન્નં શિવો વ્યાસમસાન્ત્વયચ્ચ ॥ ૮-૧૬॥

સર્વત્ર શઙ્કાકુલમેવ ચિત્તં મમેહ વિક્ષિપ્તમધીરમાર્તમ્ ।
કર્તવ્યમૂઢોઽસ્મિ સદા શિવે માં ધીરં કુરુ ત્વં વરદે નમસ્તે ॥ ૮-૧૭॥

## ૯ નવમદશકઃ - ભુવનેશ્વરીદર્શનઃ

એકાર્ણવેઽસ્મિન્ જગતિ પ્રલીને દૈત્યૌ હરિર્બ્રહ્મવધોદ્યતૌ તૌ ।
જઘાન દેવિ ત્વદનુગ્રહેણ ત્વદિચ્છયૈવાગમદત્ર રુદ્રઃ ॥ ૯-૧॥

એકો વિમાનસ્તરસાઽઽગતઃ ખાત્ત્રિમૂર્ત્યવિજ્ઞાતગતિસ્ત્વદીયઃ ।
ત્વત્પ્રેરિતા આરુરુહુસ્તમેતે સ ચોત્પતન્ વ્યોમ્નિ ચચાર શીઘ્રમ્ ॥ ૯-૨॥

વૈમાનિકાશ્ચોદ્ગતયઃ સશક્રં દિવં સપદ્મોદ્ભવસત્યલોકમ્ ।
સરુદ્રકૈલાસમમી સવિષ્ણુવૈકુણ્ઠમપ્યુત્પુલકા અપશ્યન્ ॥ ૯-૩॥

અદૃષ્ટપૂર્વાનિતરાંસ્ત્રિમૂર્તીન્ સ્થાનાનિ તેષામપિ દૃષ્ટવન્તઃ ।
ત્રિમૂર્તયસ્તે ચ વિમોહમાપુઃ પ્રાપ્તો વિમાનશ્ચ સુધાસમુદ્રમ્ ॥ ૯-૪॥

ત્વદ્ભ્રૂલતાલોલતરઙ્ગમાલં ત્વદીયમન્દસ્મિતચારુફેનમ્ ।
ત્વન્મઞ્જુમઞ્જીરમૃદુસ્વનાઢ્યં ત્વત્પાદયુગ્મોપમસૌખ્યદં ચ ॥ ૯-૫॥

તન્મધ્યતસ્તે દદૃશુર્વિચિત્રપ્રાકારનાનાદ્રુલતાપરીતમ્ ।
સ્થાનં મણિદ્વીપમદૃષ્ટપૂર્વં ક્રમાચ્છિવે ત્વાં ચ સખીસમેતામ્ ॥ ૯-૬॥

જ્ઞાત્વા દ્રુતં ત્વાં હરિરાહ દાતસ્ત્રિનેત્ર ધન્યા વયમદ્ય નૂનમ્ ।

સુધાસમુદ્રોઽયમનલ્પપુણ્યૈઃ પ્રાપ્યા જગન્માતૃનિવાસભૂમિઃ ॥ ૯-૭॥

સા દૃશ્યતે રાગિજનૈરદૃશ્યા મઞ્ચે નિષણ્ણા બહુશક્તિયુક્તા ।
એષૈવ દૃક્ સર્વમિદં ચ દૃશ્યમહેતુરેષા ખલુ સર્વહેતુઃ ॥ ૯-૮॥

બાલઃ શયાનો વટપત્ર એક એકાર્ણવેઽપશ્યમિમાં સ્મિતાસ્યામ્ ।
યયૈવ માત્રા પરિલાલિતોઽહમેનાં સમસ્તાર્તિહરાં વ્રજેમ ॥ ૯-૯॥

રુધ્યામહે દ્વારિ યદિ સ્તુવામસ્તત્ર સ્થિતા એવ વયં મહેશીમ્ ।
ઇત્યચ્યુતેનાભિહિતે વિમાનસ્ત્વદ્ગોપુરદ્વારમવાપ દેવિ ॥ ૯-૧૦॥

આયામ્યહં ચિત્તનિરોધરૂપવિમાનતસ્તે પદમદ્વિતીયમ્ ।
ન કેનચિદ્રુદ્ધગતો ભવાનિ ત્વામેવ માતઃ શરણં વ્રજામિ ॥ ૯-૧૧॥

## ૧૦ દશમદશકઃ - શક્તિપ્રદાનમ્

તતો વિમાનાદજવિષ્ણુરુદ્રાસ્ત્વદ્ગોપુરદ્વાર્યવરુહ્ય સદ્યઃ ।
સ્ત્રિયઃ કૃતા દેવિ તવેચ્છયૈવ સવિસ્મયાસ્ત્વન્નિકટં સમીયુઃ ॥ ૧૦-૧॥

કૃતપ્રણામાસ્તવ પાદયુગ્મનખેષુ વિશ્વં પ્રતિબિમ્બિતં તે ।
વિલોક્ય સાશ્ચર્યમમોઘવાગ્ભિઃ પૃથક્પૃથક્ તુષ્ટુવુરમ્બિકે ત્વામ્ ॥ ૧૦-૨॥

નુતિપ્રસન્ના નિજસર્ગશક્તિં મહાસરસ્વત્યભિધામજાય ।
રક્ષાર્થશક્તિં હરયે મહાલક્ષ્મ્યાખ્યાં ચ લીલાનિરતે દદાથ ॥ ૧૦-૩॥

ગૌરીં મહાકાલ્યભિધાં ચ દત્વા સંહારશક્તિં ગિરિશાય માતઃ ।
નવાક્ષરં મન્ત્રમુદીરયન્તી બદ્ધાઞ્જલીંસ્તાન્ સ્મિતપૂર્વમાત્થ ॥ ૧૦-૪॥

બ્રહ્મન્ હરે રુદ્ર મદીયશક્તિત્રયેણ દત્તેન સુખં ભવન્તઃ ।
બ્રહ્માણ્ડસર્ગસ્થિતિસંહૃતીશ્ચ કુર્વન્તુ મે શાસનયા વિનીતાઃ ॥ ૧૦-૫॥

માન્યા ભવદ્ભિઃ ખલુ શક્તયો મે સ્યાચ્છક્તિહીનં સકલં વિનિન્દ્યમ્ ।
સ્મરેત માં સન્તતમેવમુક્ત્વા પ્રસ્થાપયામાસિથ તાંસ્ત્રિમૂર્તીન્ ॥ ૧૦-૬॥

નત્વા ત્રયસ્તે ભવતીં નિવૃત્તાઃ પુંસ્ત્વં ગતા આરુરુહુર્વિમાનમ્ ।
સદ્યસ્તિરોધાઃ સ સુધાસમુદ્રો દ્વીપો વિમાનશ્ચ તિરોબભૂવુઃ ॥ ૧૦-૭॥

એકાર્ણવે પઙ્કજસન્નિધૌ ચ હતાસુરે તે ખલુ તસ્થિવાંસઃ ।
દૃષ્ટં નુ સત્યં કિમુ બુદ્ધિમોહઃ સ્વપ્નો નુ કિં વેત્તિ ચ ન વ્યજાનન્ ॥ ૧૦-૮॥

તતસ્ત્રયસ્તે ખલુ સત્યલોકવૈકુણ્ઠકૈલાસકૃતાધિવાસાઃ ।
બ્રહ્માણ્ડસૃષ્ટ્યાદિષુ દત્તચિત્તાસ્ત્વાં સર્વશક્તામભજન્ત દેવિ ॥ ૧૦-૯॥

સુધાસમુદ્રં તરલોર્મિમાલં સ્થાનં મણિદ્વીપમનોપમં તે ।
મધ્યે નિષણ્ણાં ભવતીં ચ ચિત્તે પશ્યાનિ તે દેવિ નમઃ પ્રસીદ ॥ ૧૦-૧૦॥

## ૧૧ એકાદશદશકઃ - બ્રહ્મનારદસંવાદઃ

શ્રીનારદઃ પદ્મજમેકદાઽઽહ પિતસ્ત્વયા સૃષ્ટમિદં જગત્કિમ્ ।
કિં વિષ્ણુના વા ગિરિશેન વા કિમકર્તૃકં વા સકલેશ્વરઃ કઃ ॥ ૧૧-૧॥

ઇતીરિતોઽજઃ સુતમાહ સાધુ પૃષ્ટં ત્વયા નારદ માં શૃણુ ત્વમ્ ।
વિભાતિ દેવી ખલુ સર્વશક્તિસ્વરૂપિણી સા ભુવનસ્ય હેતુઃ ॥ ૧૧-૨॥

એકં પરં બ્રહ્મ સદદ્વિતીયમાત્મેતિ વેદાન્તવચોભિરુક્તા ।
ન સા પુમાન્ સ્ત્રી ચ ન નિર્ગુણા સા સ્ત્રીત્વં ચ પુંસ્ત્વં ચ ગુણૈર્દધાતિ ॥ ૧૧-૩॥

સર્વં તદાવાસ્યમિદં જગત્સા જાતા ન સર્વં તત એવ જાતમ્ ।
તત્રૈવ સર્વં ચ ભવેત્પ્રલીનં સૈવાખિલં નાસ્તિ ચ કિઞ્ચનાન્યત્ ॥ ૧૧-૪॥

ગૌણાનિ ચાન્તઃકરણેન્દ્રિયાણિ સા નિર્ગુણાઽવાઙ્મતિગોચરા ચ ।
સા સ્તોત્રમન્ત્રૈઃ સગુણા મહદ્ભિઃ સંસ્તૂયતે ભક્તવિપન્નિહન્ત્રી ॥ ૧૧-૫॥

સુધાસમુદ્રે વસતીયમાર્યા દ્વીપે વિચિત્રાદ્ભુતશક્તિયુક્તા ।
સર્વં જગદ્યદ્વશગં વયં ચ ત્રિમૂર્તયો નામ યદાશ્રિતાઃ સ્મઃ ॥ ૧૧-૬॥

તદ્દત્તશક્તિત્રયમાત્રભાજસ્ત્રિમૂર્તયઃ પુત્ર વયં વિનીતાઃ ।
તદાજ્ઞયા સાધુ સદાઽપિ કુર્મો બ્રહ્માણ્ડસર્ગસ્થિતિસંહૃતીશ્ચ ॥ ૧૧-૭॥

દૈવેન મૂઢં કવિમાતનોતિ સા દુર્બલં તુ પ્રબલં કરોતિ ।
પઙ્ગું ગિરિં લઙ્ઘયતે ચ મૂકં કૃપાવતી ચાઽતનુતે સુવાચમ્ ॥ ૧૧-૮॥

યત્કિઞ્ચિદજ્ઞાયિ મયા મહત્ત્વં દેવ્યાસ્તદુક્તં તવ સઙ્ગ્રહેણ ।
સર્વત્ર તદ્વર્ણય વિસ્તરેણ વિધત્સ્વ ભક્તિં હૃદયે જનાનામ્ ॥ ૧૧-૯॥

ઇતીરિતોઽજેન મુનિઃ પ્રસન્નસ્તવ પ્રભાવં કરુણાર્દ્રચિત્તે ।
વ્યાસં તથાઽન્યાંશ્ચ યથોચિતં સ પ્રબોધયામસ પવિત્રવાગ્ભિઃ ॥ ૧૧-૧૦॥

ન મે ગુરુસ્ત્વચ્ચરિતસ્ય વક્તા ન મે મતિસ્ત્વત્સ્મરણૈકસક્તા ।
અવાચ્યવક્તાઽહમકાર્યકર્તા નમામિ માતશ્ચરણામ્બુજં તે ॥ ૧૧-૧૧॥

## ૧૨ દ્વાદશદશકઃ - ઉતથ્યજનનમ્

પુરા દ્વિજઃ કશ્ચન દેવદત્તો નામ પ્રજાર્થં તમસાસમીપે ।
કુર્વન્ મખં ગોભિલશાપવાચા લેભે સુતં મૂઢમનન્તદુઃખઃ ॥ ૧૨-૧॥

ઉતથ્યનામા વવૃધે સ બાલો મૂઢસ્તુ દૃષ્ટં ન દદર્શ કિઞ્ચિત્ ।
શ્રુતં ન શુશ્રાવ જગાદ નૈવ પૃષ્ટો ન ચ સ્નાનજપાદિ ચક્રે ॥ ૧૨-૨॥

ઇતસ્તતોઽટન્ સમવાપ્તગઙ્ગો જલે નિમજ્જન્ પ્રપિબંસ્તદેવ ।
વસન્ મુનીનામુટજેષુ વેદમન્ત્રાંશ્ચ શ઼ૃણ્વન્ સ દિનાનિ નિન્યે ॥ ૧૨-૩॥

ક્રમેણ સત્સઙ્ગવિવૃદ્ધસત્ત્વઃ સત્યવ્રતઃ સત્યતપાશ્ચ ભૂત્વા ।
નાસત્યવાક્ ત્વત્કૃપયા સ મૂઢોઽપ્યુન્મીલિતાન્તર્નયનો બભૂવ ॥ ૧૨-૪॥

કુલં પવિત્રં જનની વિશુદ્ધા પિતા ચ સત્કર્મરતઃ સદા મે ।
મયા કૃતં નૈવ નિષિદ્ધકર્મ તથાઽપિ મૂઢોઽસ્મિ જનૈશ્ચ નિન્દ્યઃ ॥ ૧૨-૫॥

જન્માન્તરે કિં નુ કૃતં મયાઽઘં કિં વા ન વિદ્યાઽર્થિજનસ્ય દત્તા ।
ગ્રન્થોઽપ્યદત્તઃ કિમુ પૂજ્યપૂજા કૃતા ન કિં વા વિધિવન્ન જાને ॥ ૧૨-૬॥

નાકારણં કાર્યમિતીર્યતે હિ દૈવં બલિષ્ઠં દુરતિક્રમં ચ ।
તતોઽત્ર મૂઢો વિફલીકૃતોઽસ્મિ વન્ધ્યદ્રુવન્નિર્જલમેઘવચ્ચ ॥ ૧૨-૭॥

ઇત્યાદિ સઞ્ચિન્ત્ય વને સ્થિતઃ સ કદાચિદેકં રુધિરાપ્લુતાઙ્ગમ્ ।
બીભત્સરૂપં કિટિમેષ પશ્યન્નચ્યચ્ય ઇત્યુત્સ્વનમુચ્ચચાર ॥ ૧૨-૮॥

શરેણ વિદ્ધઃ સ કિરિર્ભયાર્તઃ પ્રવેપમાનો મુનિવાસદેશે ।
અન્તર્નિકુઞ્જસ્ય ગતશ્ચ દૈવાદદૃશ્યતામાપ ભયાર્તિહન્ત્રિ ॥ ૧૨-૯॥

વિના મકારં ચ વિના ચ ભક્તિમુચ્ચાર્ય વાગ્બીજમનું પવિત્રમ્ ।
પ્રસન્નબુદ્ધિઃ કૃપયા તવૈષ બભૂવ દૂરીકૃતસર્વપાપઃ ॥ ૧૨-૧૦॥

નાહં કવિર્ગાનવિચક્ષણો ન નટો ન શિલ્પાદિષુ ન પ્રવીણઃ ।
પશ્ચાત્ર માં મૂઢમનન્યબન્ધું પ્રસન્નબુદ્ધિં કુરુ માં નમસ્તે ॥ ૧૨-૧૧॥

## ૧૩ ત્રયોદશદશકઃ - ઉતથ્યમહિમા

અથાગતઃ કશ્ચિદધિજ્યધન્વા મુનિં નિષાદઃ સહસા જગાદ ।
ત્વં સત્યવાગ્બ્રૂહિ મુને ત્વયા કિં દૃષ્ટઃ કિટિઃ સાયકવિદ્ધદેહઃ ॥ ૧૩-૧॥

દૃષ્ટસ્ત્વયા ચેદ્વદ સૂકરઃ ક્વ ગતો ન વાઽદૃશ્યત કિં મુનીન્દ્ર ।
અહં નિષાદઃ ખલુ વન્યવૃત્તિર્મમાસ્તિ દારાદિકપોષ્યવર્ગઃ ॥ ૧૩-૨॥

શ્રુત્વા નિષાદસ્ય વચો મુનિઃ સ તૂષ્ણીં સ્થિતશ્ચિન્તયતિ સ્મ ગાઢમ્ ।
વદામિ કિં દૃષ્ટ ઇતીર્યતે ચેદ્ધન્યાદયં તં મમ ચાપ્યઘં સ્યાત્ ॥ ૧૩-૩॥

સત્યં નરં રક્ષતિ રક્ષિતં ચેદસત્યવક્તા નરકં વ્રજેચ્ચ ।
સત્યં હિ સત્યં સદયં ન કિઞ્ચિત્સત્યં કૃપાશૂન્યમિદં મતં મે ॥ ૧૩-૪॥

એવં મુનેશ્ચિન્તયતઃ સ્વકાર્યવ્યગ્રો નિષાદઃ પુનરેવમૂચે ।
દૃષ્ટસ્ત્વયા કિં સ કિટિર્ન કિં વા દૃષ્ટઃ સ શીઘ્રં કથયાત્ર સત્યમ્ ॥ ૧૩-૫॥

મુનિસ્તમાહાત્ર પુનઃ પુનઃ કિં નિષાદ માં પૃચ્છસિ મોહમગ્નઃ ।
પશ્યન્ ન ભાષેત ન ચ બ્રુવાણઃ પશ્યેદલં વાગ્ભિરવેહિ સત્યમ્ ॥ ૧૩-૬॥

ઉન્માદિનો જલ્પનમેતદેવં મત્વા નિષાદઃ સહસા જગામ ।
ન સત્યમુક્તં મુનિના ન કોલો હતશ્ચ સર્વં તવ દેવિ લીલાઃ ॥ ૧૩-૭॥

દ્રષ્ટા પરં બ્રહ્મ તદેવ ચ સ્યાદિતિ શ્રુતિઃ પ્રાહ ન ભાષતે સઃ ।
સદા બ્રુવાણસ્તુ ન પશ્યતીદમયં હિ સત્યવ્રતવાક્યસારઃ ॥ ૧૩-૮॥

ભૂયઃ સ સારસ્વતબીજમન્ત્રં ચિરં જપન્ જ્ઞાનનિધિઃ કવિશ્ચ ।
વાલ્મીકિવત્સર્વદિશિ પ્રસિદ્ધો બભૂવ બન્ધૂન્ સમતર્પયચ્ચ ॥ ૧૩-૯॥

સ્મૃતા નતા દેવિ સુપૂજિતા વા શ્રુતા નુતા વા ખલુ વન્દિતા વા ।
દદાસિ નિત્યં હિતમાશ્રિતેભ્યઃ કૃપાર્દ્રચિત્તે સતતં નમસ્તે ॥ ૧૩-૧૦॥

## ૧૪ ચતુર્દશદશકઃ - સુદર્શનકથા - ભરદ્વાજાશ્રમપ્રવેશમ્

રાજા પુરાઽઽસીત્કિલ કોસલેષુ ધર્મૈકનિષ્ઠો ધ્રુવસન્ધિનામા ।
આસ્તાં પ્રિયે અસ્ય મનોરમા ચ લીલાવતી ચેતિ દૃઢાનુરક્તે ॥ ૧૪-૧॥

મનોરમાઽસૂત સુદર્શનાખ્યં કુમારકં શત્રુજિતં ચ સાઽન્યા ।
સંવર્ધયંસ્તૌ મૃગયાવિહારી વને નૃપો હા હરિણા હતોઽભૂત્ ॥ ૧૪-૨॥

વિચિન્તયન્ રાજકુલસ્ય વૃત્તં તજ્જ્યેષ્ઠપુત્રસ્ય સુદર્શનસ્ય ।
રાજ્યાભિષેકાય ગુરુર્વસિષ્ઠશ્ચકાર મન્ત્રં સચિવૈઃ સમેતઃ ॥ ૧૪-૩ ॥

માતામહઃ શત્રુજિતો યુધાજિદભ્યેત્ય સદ્યોઽમિતવીર્યશાલી ।
રાજ્યે સ્વદૌહિત્રમિહાભિષિક્તં કર્તું કુબુદ્ધિઃ કુરુતે સ્મ યત્નમ્ ॥ ૧૪-૪ ॥

મનોરમાયા અપિ વીરસેનઃ પિતાઽભ્યુપેત્યાશુ રુરોધ તસ્ય ।
યત્નં બલી સ્વસ્વસુતાસુતાભિષેકૈકબુદ્ધી ખલુ તાવભૂતામ્ ॥ ૧૪-૫ ॥

કૃત્વા વિવાદં ચ તતો નૃપૌ દ્વૌ ઘોરં રણં ચક્રતુરિદ્ધરોષૌ ।
યુધાજિતા તત્ર તુ વીરસેનો દૈવાદ્ધતોઽભૂદ્ધરિણા કરીવ ॥ ૧૪-૬ ॥

રાજ્યેઽભિષિક્તઃ ખલુ શત્રુજિત્સ બાલસ્તતોઽયં રિપુભિર્યુધાજિત્ ।
દૌહિત્રરાજ્યં સુખમેકનાથઃ શશાસ વજ્રીવ દિવં મહેશિ ॥ ૧૪-૭ ॥

પત્યુઃ પિતુશ્ચાપિ મૃતેરનાથા ભીતા વિદલ્લાભિધમન્ત્રિયુક્તા ।
મનોરમા બાલસુતા ત્વરણ્યે યયૌ ભરદ્વાજમુનિં શરણ્યમ્ ॥ ૧૪-૮ ॥

તપોનિધિર્દીનજનાનુકમ્પી જ્ઞાત્વા મુનિસ્તાં ધ્રુવસન્ધિપત્નીમ્ ।
ઉવાચ- વત્સે વસ નિર્ભયૈવ તપોવનેઽત્રાસ્તુ શુભં તવેતિ ॥ ૧૪-૯ ॥

અલ્પોઽપ્યુપેક્ષ્યો ન રિપુર્ન રોગોઽપ્યેવં સ્મરન્નાશુ નૃપો યુધાજિત્ ।
તાં હર્તુકામઃ સસુતાં મહર્ષેઃ પ્રાપાશ્રમં મન્ત્રિવરેણ સાકમ્ ॥ ૧૪-૧૦ ॥

ન માનિતસ્તેન તપસ્વિના સ મનોરમાં નૈવ સુતં ચ લેભે ।
પ્રહર્તુકામોઽપિ મુનિં સ મન્ત્રિવાચા નિવૃત્તઃ શ્રુતકૌશિકોઽભૂત્ ॥ ૧૪-૧૧ ॥

એવં મુનિસ્તાં સસુતાં રરક્ષ ભીતોઽસ્મિ સંસારયુધાજિતોઽહમ્ ।
ન મે સહાયોઽસ્તિ વિના ત્વયૈષ સનૂપુરં તે ચરણં નમામિ ॥ ૧૪-૧૨ ॥

## ૧૫ પઞ્ચદશદશકઃ - સુદર્શનકથા - દેવીદર્શનમ્

એવં તવૈવ કૃપયા મુનિવર્યશીતચ્છાયાશ્રિતો હતભયઃ સ સુદર્શનોઽયમ્ ।
વેદધ્વનિશ્રવણપૂતહૃદાશ્રમાન્તે સમ્મોદયન્ મુનિજનાન્ વવૃધે કુમારઃ ॥ ૧૫-૧ ॥

આબાલ્યમેષ મુનિબાલકસઙ્ગમેન ક્લીં ક્લીમિતીશ્વરિ સદા તવ બીજમન્ત્રમ્ ।
તત્રોચ્ચચાર કૃપયાઽસ્ય પુરઃ કદાચિદાવિર્બભૂવિથ નતં તમભાષથાશ્ચ ॥ ૧૫-૨ ॥

પ્રીતાઽસ્મિ તે સુત જગજ્જનનીમવેહિ માં સર્વકામવરદાં તવ ભદ્રમસ્તુ ।
ચન્દ્રાનનાં શશિકલાં વિમલાં સુબાહોઃ કાશીશ્વરસ્ય તનયાં વિધિનોદ્વહ ત્વમ્ ॥ ૧૫-૩ ॥

નષ્ટા ભવેયુરચિરેણ તવારિવર્ગા રાજ્યં ચ યૈરપહૃતં પુનરેષ્યસિ ત્વમ્ ।
માતૃદ્વયેન સચિવૈશ્ચ સમં સ્વધર્માન્ કુર્યાઃ સદેતિ સમુદીર્ય તિરોદધાથ ॥ ૧૫-૪॥

સ્વપ્ને ત્વયા શશિકલા કથિતાઽસ્તિ ભારદ્વાજાશ્રમે પ્રથિતકોસલવંશજાતઃ ।
ધીમાન્ સુદર્શન ઇતિ ધ્રુવસન્ધિપુત્ર એનં પતિં વૃણુ તવાસ્તુ શુભં સદેતિ ॥ ૧૫-૫॥

સ્વપ્નાનુભૂતમનૃતં કિમૃતં ન વેતિ સુપ્તોત્થિતા તુ મતિમત્યપિ ન વ્યજાનાત્ ।
પૃષ્ટાત્સુદર્શનકથાં સુમુખી દ્વિજાત્સા શ્રુત્વાઽનુરક્તહૃદયૈવ બભૂવ દેવિ ॥ ૧૫-૬॥

જ્ઞાત્વા સુબાહુરિદમાકુલમાનસસ્તામસ્માન્નિવર્ત્તયિતુમાશુ સહેષ્ટપત્ન્યા ।
કૃત્વા પ્રયત્નમખિલં વિફલં ચ પશ્યન્નિચ્છાસ્વયંવરવિધિં હિતમેવ મેને ॥ ૧૫-૭॥

કશ્ચિત્કદાચન સુદર્શનમેત્ય વિપ્રઃ પ્રાહાગતઃ શશિકલાવચસાઽહમત્ર ।
સા ત્વાં બ્રવીતિ- નૃપપુત્ર જગજ્જનન્યા વાચા વૃતોઽસિ પતિરસ્મિ તવૈવ દાસી ॥ ૧૫-૮॥

અત્રાગતા નૃપતયો બહવસ્ત્વમેત્ય તેષાં સુધીર મિષતાં નય માં પ્રિયાં તે ।
એવં વધૂવચનમાનય તાં સુશીલાં ભદ્રં તવાસ્ત્વિદમુદીર્ય જગામ વિપ્રઃ ॥ ૧૫-૯॥

સ્વપ્ને ચ જાગ્રતિ ચ પશ્યતિ ભક્તવર્યસ્ત્વાં સન્તતં તવ વચો મધુરં શ઼ૃણોતિ ।
ઐશ્વર્યમાશુ લભતેઽપિ ચ મુક્તિમેતિ ત્વદ્ભક્તિમેવ મમ દેહિ નમો જનન્યૈ ॥ ૧૫-૧૦॥

## ૧૬ ષોડશદશકઃ - સુદર્શનવિવાહમ્

શ્રુત્વા વધૂવાક્યમરં કુમારો હૃષ્ટો ભરદ્વાજમુનિં પ્રણમ્ય ।
આપૃછ્ય માત્રા સહ દેવિ સ ત્વાં સ્મરન્ રથેનાપ પુરં સુબાહોઃ ॥ ૧૬-૧॥

સ્વયંવરાહૂતમહીભુજાં સ સભાં પ્રવિષ્ટો હતભીર્નિષણ્ણઃ ।
કન્યા કલા પૂર્ણશશી ત્વસાવિત્યાહુર્જનાસ્તામભિવીક્ષમાણાઃ ॥ ૧૬-૨॥

વધૂશ્ચ તદ્દર્શનવર્ધિતાનુરાગા સ્મરન્તી તવ વાક્યસારમ્ ।
સભાં નૃપાણામજિતેન્દ્રિયાણાં ન પ્રાવિશત્સા પિતૃચોદિતાઽપિ ॥ ૧૬-૩॥

શઙ્કાકુલાસ્તે નૃવરા બભૂવુરુચ્ચૈર્યુધાજિત્કુપિતો જગાદ- ।
મા દીયતાં લોકહિતાનભિજ્ઞા વધૂરશક્તાય સુદર્શનાય ॥ ૧૬-૪॥

બાલોઽયમિત્યેષ મયાઽઽશ્રમે પ્રાગુપેક્ષિતઃ સોઽત્ર રિપુત્વમેતિ ।
માઽયં ચ વધ્વા વ્રિયતાં વૃતશ્ચેદ્ધન્યામિમં તાં ચ હરેયમાશુ ॥ ૧૬-૫॥

શ્રુત્વા યુધાજિદ્વચનં નૃપાલા હિતૈષિણઃ કેચિદુપેત્ય સર્વમ્ ।

સુદર્શનં પ્રોચુરથાપિ ધીરઃ સ નિર્ભયો નૈવ ચચાલ દેવિ ॥ ૧૬-૬॥

એકત્ર પુત્રી ચ સુદર્શનશ્ચ યુધાજિદન્યત્ર બલી સકોપઃ ।
તન્મધ્યગો મંક્ષુ નૃપઃ સુબાહુર્બદ્ધાઞ્જલિઃ પ્રાહ નૃપાન્ વિનમ્રઃ ॥ ૧૬-૭॥

નૃપા વચો મે શ‌ૃણુતેહ બાલા નાયાતિ પુત્રી મમ મણ્ડપેઽત્ર ।
તત્ક્ષમ્યતાં શ્વોઽત્ર નયામ્યહં તાં યાતાદ્ય વો વિશ્રમમન્દિરાણિ ॥ ૧૬-૮॥

ગતેષુ સર્વેષુ સુદર્શનસ્તુ ત્વાં સંસ્મરન્ માતૃહિતાનુસારી ।
સુબાહુના તન્નિશિ તેન દત્તાં વધૂં યથાવિધ્યુદુવાહ દેવિ ॥ ૧૬-૯॥

પ્રાતર્યુધાજિત્પ્રબલો વિવાહવાર્તાં નિશમ્યાત્તરુષા સસૈન્યઃ ।
સુદર્શનં માતૃવધૂસમેતં યાત્રોન્મુખં ભીમરવો રુરોધ ॥ ૧૬-૧૦॥

તતો રણે ઘોરતરે સુબાહુઃ ક્લીં ક્લીમિતીશાનિ સમુચ્ચચાર ।
તત્રાવિરાસીઃ સમરાઙ્ગણે ત્વં સિંહાધિરૂઢા સ્વજનાર્તિહન્ત્રી ॥ ૧૬-૧૧॥

ત્વન્નામ ગાયન્ કથયન્ ગુણાંસ્તે ત્વાં પૂજયંશ્ચાત્ર નયામિ કાલમ્ ।
સ્વપ્નેઽપિ દૃષ્ટા ન મયા ત્વમમ્બે કૃપાં કુરુ ત્વં મયિ તે નમોઽસ્તુ ॥ ૧૬-૧૨॥

## ૧૭ સપ્તદશદશકઃ - સુદર્શનકોસલપ્રાપ્તિઃ

યુધાજિતં શત્રુજિતં ચ હત્વા રણાઙ્ગણસ્થા નુતિભિઃ પ્રસન્ના ।
સુબાહુમુખ્યાનનુગૃહ્ય ભક્તાન્ સર્વેષુ પશ્યત્સુ તિરોદધાથ ॥ ૧૭-૧॥

પૃષ્ટો નૃપાન્ પ્રાહ સુદર્શનસ્તાન્ દૃષ્ટા ભવદ્ભિઃ ખલુ સર્વશક્તા ।
યા નિર્ગુણા યોગિભિરપ્યદૃશ્યા દૃશ્યા ચ ભક્તૈઃ સગુણા વિનીતૈઃ ॥ ૧૭-૨॥

યા રાજસીદં સૃજતીવ શક્તિર્યા સાત્વિકી પાલયતીવ વિશ્વમ્ ।
યા તામસી સંહરતીવ સર્વં સદ્વસ્તુ સૈવાન્યદસત્સમસ્તમ્ ॥ ૧૭-૩॥

ભક્તાર્તિહન્ત્રી કરુણામયી સા ભક્તદ્રુહાં ભીતિકરી પ્રકામમ્ ।
વસન્ ભરદ્વાજતપોવનાન્તે ચિરાય માત્રા સહ તાં ભજેઽહમ્ ॥ ૧૭-૪॥

તામેવ ભક્ત્યા ભજતેહ ભુક્તિમુક્તિપ્રદામસ્તુ શુભં સદા વઃ ।
શ્રુત્વેદમાનમ્રમુખાસ્તથેતિ સમ્મન્ત્ર્ય ભૂપાશ્ચ તતો નિવૃત્તાઃ ॥ ૧૭-૫॥

સુદર્શનો માતૃવધૂસમેતઃ સુબાહુમાપૃચ્છ્ય રથાધિરૂઢઃ ।
પુરીમયોધ્યાં પ્રવિશન્ પુરેવ સીતાપતિસ્તોષયતિ સ્મ સર્વાન્ ॥ ૧૭-૬॥

લીલાવતીં પ્રાપ્ય વિમાતરં ચ નત્વા વિષણ્ણાં હતપુત્રતાતામ્ ।
સદુક્તિભિઃ કર્મગતીઃ પ્રબોધ્ય સ સાન્ત્વયામાસ મહેશિ ભક્તઃ ॥ ૧૭-૭॥

જનેષુ પશ્યત્સુ સુદર્શનોઽત્ર ત્વાં પૂજયિત્વા ગુરુણાઽભિષિક્તઃ ।
રાજ્યે ત્વદીયં ગૃહમાશુ કૃત્વા પૂજાવિધાનાદિ ચ સંવૃધત્ત ॥ ૧૭-૮॥

તસ્મિન્ નૃપે ત્વત્સદનાનિ કૃત્વા જનાઃ પ્રતિગ્રામમપૂજયંસ્ત્વામ્ ।
કાશ્યાં સુબાહુશ્ચ તથાઽકરોત્તે સર્વત્ર પેતુઃ કરુણાકટાક્ષાઃ ॥ ૧૭-૯॥

ન કર્મણા ન પ્રજયા ધનેન ન યોગસાઙ્ખ્યાદિવિચિન્તયા ચ ।
ન ચ વ્રતેનાપિ સુખાનુભૂતિર્ભક્ત્યૈવ મર્ત્યઃ સુખમેતિ માતઃ ॥ ૧૭-૧૦॥

નાહં સુબાહુશ્ચ સુદર્શનશ્ચ ન મે ભરદ્વાજમુનિઃ શરણ્યઃ ।
ગુરુઃ સુહૃદ્બન્ધુરપિ ત્વમેવ મહેશ્વરિ ત્વાં સતતં નમામિ ॥ ૧૭-૧૧॥

## ૧૮ અષ્ટાદશદશકઃ - રામકથા

સૂર્યાન્વયે દાશરથી રમેશો રામાભિધોઽભૂદ્ભરતોઽથ જાતઃ ।
જ્યેષ્ઠાનુવર્ત્તી ખલુ લક્ષ્મણશ્ચ શત્રુઘ્નનામાઽપિ જગદ્વિધાત્રિ ॥ ૧૮-૧॥

વિમાતૃવાક્યોજ્ઝિતરાજ્યભોગો રામઃ સસીતઃ સહલક્ષ્મણશ્ચ ।
ચરન્ જટાવલ્કલવાનરણ્યે ગોદાવરીતીરમવાપ દેવિ ॥ ૧૮-૨॥

તં વઞ્ચયન્ રાવણ એત્ય માયી જહાર સીતાં યતિરૂપધારી ।
રામસ્ય પત્નીવિરહાતુરસ્ય શ્રુત્વા વિલાપં વનમપ્યરોદીત્ ॥ ૧૮-૩॥

શ્રીનારદોઽભ્યેત્ય જગાદ રામં કિં રોદિષિ પ્રાકૃતમર્ત્યતુલ્યઃ ।
ત્વં રાવણં હન્તુમિહાવતીર્ણો હરિઃ કથં વિસ્મરસીદમાર્ય ॥ ૧૮-૪॥

કૃતે યુગે વેદવતીતિ કન્યા હરિં શ્રુતિજ્ઞા પતિમાપ્તુમૈચ્છત્ ।
સા પુષ્કરદ્વીપગતા તદર્થમેકાકિની તીવ્રતપશ્ચકાર ॥ ૧૮-૫॥

શ્રુતા તયાઽભૂદશરીરિવાક્ તે હરિઃ પતિર્ભાવિનિ જન્મનિ સ્યાત્ ।
નિશમ્ય તદ્ધૃષ્ટમનાસ્તથૈવ કૃત્વા તપસ્તત્ર નિનાય કાલમ્ ॥ ૧૮-૬॥

તાં રાવણઃ કામશરાર્દ્દિતઃ સંશ્ચકર્ષ સા ચ સ્તવનેન દેવીમ્ ।
પ્રસાદ્ય કોપારુણલોચનાભ્યાં નિરીક્ષ્ય તં નિશ્ચલમાતતાન ॥ ૧૮-૭॥

શશાપ તં ચ ત્વમરે મદર્થે સબાન્ધવો રાક્ષસ નંક્ષ્યસીતિ ।
સ્વં કૌણપસ્પૃષ્ટમશુદ્ધદેહં યોગેન સદ્યો વિજહૌ સતી સા ॥ ૧૮-૮॥

જાતા પુનઃ સા મિથિલેશકન્યા કાલે હરિં ત્વાં પતિમાપ દૈવાત્ ।
સ હન્યતાં સત્વરમાશરેન્દ્રસ્તન્નાશકાલસ્તુ સમાગતશ્ચ ॥ ૧૮-૯॥

તદર્થમારાધય લોકનાથાં નવાહયજ્ઞેન કૃતોપવાસઃ ।
પ્રસાદ્ય તામેવ સુરા નરાશ્ચ કામાન્ લભન્તે શુભમેવ તે સ્યાત્ ॥ ૧૮-૧૦॥

ઇત્યૂચિવાંસં મુનિમેવ રામ આચાર્યમાકલ્પ્ય સલક્ષ્મણસ્ત્વામ્ ।
સમ્પૂજ્ય સુસ્મેરમુખીં વ્રતાન્તે સિંહાધિરૂઢાં ચ પુરો દદર્શ ॥ ૧૮-૧૧॥

ભક્ત્યા નતં તં દ્રુતમાત્થ રામ હરિસ્ત્વમંશેન મદાજ્ઞયૈવ ।
જાતો નરત્વેન દશાસ્યહત્યૈ દદામિ તચ્છક્તિમહં તવેહ ॥ ૧૮-૧૨॥

શ્રુત્વા તવોક્તિં સ હનૂમદાદ્યૈઃ સાકં કપીન્દ્રૈઃ કૃતસેતુબન્ધઃ ।
લઙ્કાં પ્રવિષ્ટો હતરાવણાદ્યઃ પુરીમયોધ્યામગમત્સસીતઃ ॥ ૧૮-૧૩॥

હા દેવિ ભક્તિર્ન હિ મે ગુરુશ્ચ ન ચૈવ વસ્તુગ્રહણે પટુત્વમ્ ।
સત્સઙ્ગતિશ્ચાપિ ન તે પતન્તુ કૃપાકટાક્ષા મયિ તે નમોઽસ્તુ ॥ ૧૮-૧૪॥

## ૧૯ એકોનવિંશદશકઃ - ભૂમ્યાઃ દુઃખમ્ ૧

પુરા ધરા દુર્જનભારદીના સમં સુરભ્યા વિબુધૈશ્ચ દેવિ ।
વિધિં સમેત્ય સ્વદશામુવાચ સ ચાનયત્ક્ષીરપયોનિધિં તાન્ ॥ ૧૯-૧॥

સ્તુતો હરિઃ પદ્મભવેન સર્વં જ્ઞાત્વાઽખિલાન્ સાઞ્જલિબદ્ધમાહ ।
બ્રહ્મન્ સુરા નૈવ વયં સ્વતન્ત્રા દૈવં બલીયઃ કિમહં કરોમિ ॥ ૧૯-૨॥

દૈવેન નીતઃ ખલુ મત્સ્યકૂર્મકોલાદિજન્માન્યવશોઽહમાપ્તઃ ।
નૃસિંહભાવાદતિભીકરત્વં હયાનનત્વાત્પરિહાસ્યતાં ચ ॥ ૧૯-૩॥

જાતઃ પુનર્દાશરથિશ્ચ દુઃખાદ્દુઃખં ગતોઽહં વિપિનાન્તચારી ।
રાજ્યં ચ નષ્ટં દયિતા હૃતા મે પિતા મૃતો હા પ્લવગાઃ સહાયાઃ ॥ ૧૯-૪॥

કૃત્વા રણં ભીમમરિં નિહત્ય પત્નીં ચ રાજ્યં ચ પુનર્ગૃહીત્વા ।
દુષ્ટાપવાદેન પતિવ્રતાં તાં વિહાય હા દુર્યશસાઽભિષિક્તઃ ॥ ૧૯-૫॥

યદિ સ્વતન્ત્રોઽસ્મિ મમૈવમાર્તિર્ન સ્યાદ્વયં કર્મકલાપબદ્ધાઃ ।
સદાઽપિ માયવશગાસ્તતોઽત્ર માયાધિનાથાં શરણં વ્રજામઃ ॥ ૧૯-૬॥

ઇતીરિતૈર્ભક્તિવિનમ્રશીર્ષૈર્નિમીલિતાક્ષૈર્વિબુધૈઃ સ્મૃતા ત્વમ્ ।

પ્રભાતસન્ધ્યેવ જપાસુમાઙ્ગી તમોનિહન્ત્રી ચ પુરઃ સ્થિતાઽઽત્થ ॥ ૧૯-૭॥

જાને દશાં વો વસુદેવપુત્રો ભૂત્વા હરિર્દુષ્ટજનાન્ નિહન્તા ।
તદર્થશક્તીરહમસ્ય દદ્યામંશેન જાયેય ચ નન્દપુત્રી ॥ ૧૯-૮॥

યૂયં ચ સાહાય્યમમુષ્ય કર્તુમંશેન દેવા દયિતાસમેતાઃ ।
જાયેધ્વમુર્વ્યાં જગતોઽસ્તુ ભદ્રમેવં વિનિર્દિશ્ય તિરોદધાથ ॥ ૧૯-૯॥

વિચિત્રદુષ્ટાસુરભાવભારનિપીડિતં મે હૃદયં મહેશિ ।
અત્રાવતીર્યેદમપાકુરુ ત્વં માતા હિ મે તે વરદે નમોઽસ્તુ ॥ ૧૯-૧૦॥

## ૨૦ વિંશદશકઃ - દેવકીપુત્રવધં

અથોરુપુણ્યે મથુરાપુરે તુ વિભૂષિતે મૌક્તિકમાલિકાભિઃ ।
શ્રીદેવકીશૌરિવિવાહરઙ્ગે સર્વૈઃ શ્રુતં વ્યોમવચઃ સ્ફુટાર્થમ્ ॥ ૨૦-૧॥

અવેહિ ભો દેવકનન્દનાયાઃ સુતોઽષ્ટમઃ કંસ તવાન્તકઃ સ્યાત્ ।
શ્રુત્વેતિ તાં હન્તુમસિં દધાનઃ કંસો નિરુદ્ધો વસુદેવમુખ્યૈઃ ॥ ૨૦-૨॥

અથાહ શૌરિઃ શ‍ૃણુ કંસ પુત્રાન્ દદામિ તેઽસ્યાઃ શપથં કરોમિ ।
એતદ્વચો મે વ્યભિચર્યતે ચેન્મત્પૂર્વજાતા નરકે પતન્તુ ॥ ૨૦-૩॥

શ્રદ્ધાય શૌરેર્વચનં પ્રશાન્તસ્તાં દેવકીં ભોજપતિર્મુમોચ ।
સર્વે ચ તુષ્ટા યદવો નગર્યાં તૌ દમ્પતી ચોષતુરાત્તમોદમ્ ॥ ૨૦-૪॥

કાલે સતી પુત્રમસૂત તાતઃ કંસાય નિશ્શઙ્કમદાત્સુતં સ્વમ્ ।
હન્તા ન મેઽયં શિશુરિત્યુદીર્ય તં પ્રત્યદાદ્ભોજપતિશ્ચ તસ્મૈ ॥ ૨૦-૫॥

અથાશુ ભૂભારવિનાશનાખ્યત્વન્નાટકપ્રેક્ષણકૌતુકેન ।
શ્રીનારદઃ સર્વવિદેત્ય કંસમદૃશ્યહાસં સકલં જગાદ ॥ ૨૦-૬॥

ત્વં ભૂપ દૈત્યઃ ખલુ કાલનેમિર્જગત્પ્રસિદ્ધો હરિણા હતશ્ચ ।
તતોઽત્ર જાતોઽસિ સુરા હરિશ્ચ ત્વાં હન્તુમિચ્છન્ત્યધુનાઽપિ શત્રુમ્ ॥ ૨૦-૭॥

દેવાસ્તદર્થં નરરૂપિણોઽત્ર વ્રજે ચ જાતા વસુદેવમુખ્યાઃ ।
નન્દાદયશ્ચ ત્રિદશા ઇમે ન વિસ્રમ્ભણીયા ન ચ બાન્ધવાસ્તે ॥ ૨૦-૮॥

ત્વં વ્યોમવાણીં સ્મર દેવકસ્ય પુત્ર્યાઃ સુતેષ્વષ્ટમતાં ગતઃ સન્ ।
સ ત્વાં નિહન્તા હરિરેવ શત્રુરલ્પોઽપિ નોપેક્ષ્ય ઇતીર્યતે હિ ॥ ૨૦-૯॥

સર્વાત્મજાનાં નૃપ મેલનેઽસ્યાઃ સર્વેઽષ્ટમાઃ સ્યુઃ પ્રથમે ચ સર્વે ।
માયાવિનં વિદ્ધિ હરિં સદેતિ ગતે મુનૌ ક્રોધમિયાય કંસઃ ॥ ૨૦-૧૦॥

સ દેવકીસૂનુમરં જઘાન કારાગૃહે તાં પતિમપ્યબધ્નાત્ ।
તયોઃ સુતાન્ ષટ્ ખલુ જાતમાત્રાન્ હત્વા કૃતં સ્વં હિતમેવ મેને ॥ ૨૦-૧૧॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા મા જાતુ પાપં કરવાણિ દેવિ ।
મમાસ્તુ સત્કર્મરતિઃ પ્રિયસ્તે ભવાનિ ભક્તં કુરુ માં નમસ્તે ॥ ૨૦-૧૨॥

## ૨૧ એકવિંશદશકઃ - નન્દસુતાવતારઃ

સર્વેઽપિ જીવા નિજકર્મબદ્ધા એતે ષડાસન્દ્રુહિણસ્ય પૌત્રાઃ ।
તન્નિન્દયા દૈત્યકુલે પ્રજાતાઃ પુનશ્ચ શપ્તા જનકેન દૈવાત્ ॥ ૨૧-૧॥

તેનૈવ તે શૌરિસુતત્વમાપ્તા હતાશ્ચ કંસેન તુ જાતમાત્રાઃ ।
શ્રીનારદેનર્ષિવરેણ દેવિ જ્ઞાતં પુરાવૃત્તમિદં સમસ્તમ્ ॥ ૨૧-૨॥
પ્રાગ્દમ્પતી ચાદિતિકશ્યપૌ હા સ્વકર્મદોષેણ પુનશ્ચ જાતૌ ।
તૌ દેવકીશૂરસુતૌ સ્વપુત્રનાશાદિભિર્દુઃખમવાપતુશ્ચ ॥ ૨૧-૩॥

ત્વં દેવકીસપ્તમગર્ભતો વૈ ગૃહ્ણન્ત્યનન્તાંશશિશું સ્વશક્ત્યા ।
નિવેશ્ય રોહિણ્યુદરે ધરણ્યાં મર્ત્યો ભવેત્યચ્યુતમાદિશશ્ચ ॥ ૨૧-૪॥

પ્રાક્કર્મદોષાત્સ સુહૃન્મઘોનઃ ક્રુદ્ધેન શપ્તો ભૃગુણા મુરારિઃ ।
દયાર્હસંસારિદશામવાપ્સ્યન્ હા દેવકીગર્ભમથાવિવેશ ॥ ૨૧-૫॥

પૂર્ણે તુ ગર્ભે હરિરર્દ્ધરાત્રે કારાગૃહે દેવકનન્દનાયાઃ ।
જજ્ઞે સુતેષ્વષ્ટમતામવાપ્તઃ શૌરિર્વિમુક્તો નિગડૈશ્ચ બન્ધાત્ ॥ ૨૧-૬॥

વ્યોમોત્થવાક્યેન તવૈવ બાલં ગૃહ્ણન્નદૃષ્ટઃ ખલુ ગેહપાલૈઃ ।
નિદ્રાં ગતૈસ્ત્વદ્વિવૃતેન શૌરિર્દ્વારેણ યાતો બહિરાત્તતોષમ્ ॥ ૨૧-૭॥

ત્વં સ્વેચ્છયા ગોપકુલે યશોદાનન્દાત્મજા સ્વાપિતજીવજાલે ।
અજાયથા ભક્તજનાર્તિહન્ત્રી સર્વં નિયન્ત્રી સકલાર્થદાત્રી ॥ ૨૧-૮॥

તવ પ્રભાવાદ્વસુદેવ એકો ગચ્છન્નભીતો યમુનામયત્નમ્ ।
તીર્ત્વા નદીં ગોકુલમાપ તત્ર દાસ્યાઃ કરે સ્વં તનયં દદૌ ચ ॥ ૨૧-૯॥

તયૈવ દત્તામથ બાલિકાં ત્વામાદાય શીઘ્રં સ તતો નિવૃત્તઃ ।
કારાગૃહં પ્રાપ્ય દદૌ પ્રિયાયૈ સ ચાભવત્પૂર્વવદેવ બદ્ધઃ ॥ ૨૧-૧૦॥

ત્વદ્રોદનોત્થાપિતગેહપાલૈર્નિવેદિતો ભોજપતિઃ સમેત્ય ।
ત્વાં પાદયુગ્મગ્રહણેન કુર્વન્નધઃશિરસ્કાં નિરગાદ્ગૃહાન્તાત્ ॥ ૨૧-૧૧॥

સ પોથયામાસ શિલાતલે ત્વાં સદ્યઃ સમુત્પત્ય કરાદમુષ્ય ।
દિવિ સ્થિતા શઙ્ખગદાદિહસ્તા સુરૈઃ સ્તુતા સ્મેરમુખી ત્વમાત્થ ॥ ૨૧-૧૨॥

વધેન કિં મે તવ કંસ જાતસ્તવાન્તકઃ ક્વાપ્યવિદૂરદેશે ।
મા દ્રુહ્યતાં સાધુજનો હિતં સ્વં વિચિન્તયેત્યુક્તવતી તિરોઽભૂઃ ॥ ૨૧-૧૩॥

સ ભોજરાટ્ સ્વાન્તકનાશનાય સર્વાન્ શિશૂન્ હન્તુમરં બલિષ્ઠાન્ ।
વત્સાઘમુખ્યાનસુરાન્નિયુજ્ય કૃતાર્થમાત્માનમમન્યતોચ્ચૈઃ ॥ ૨૧-૧૪॥

કંસોઽસ્તિ મે ચેતસિ કામલોભક્રોધાદિમન્ત્રિપ્રવરૈઃ સમેતઃ ।
સદ્ભાવહન્તા ખલુ નન્દપુત્રિ તં નાશય ત્વચ્ચરણં નમામિ ॥ ૨૧-૧૫॥

## ૨૨ દ્વાવિંશદશકઃ - કૃષ્ણકથા

શ્રિયઃપતિર્ગોમલમૂત્રગન્ધિન્યસ્તપ્રભો ગોપકુલે વિષણ્ણઃ ।
કૃષ્ણાભિધો વત્સબકાદિભીતો રુદન્ સદા દેવી નિનાય બાલ્યમ્ ॥ ૨૨-૧॥

હૈયઙ્ગવીનં મથિતં પયશ્ચ ગોપીર્વિલજ્જઃ સતતં યયાચે ।
સ ચામ્બયા ગોરસચૌર્યચુઞ્ચુરુલૂખલે પાશવરેણ બદ્ધઃ ॥ ૨૨-૨॥

વનેષુ ભીમાતપશુષ્કગાત્રો ગાશ્ચારયન્ કણ્ટકવિદ્ધપાદઃ ।
વન્યામ્બુપાયી ફલમૂલભક્ષી દિને દિને ગ્લાનિમવાપ કૃષ્ણઃ ॥ ૨૨-૩॥

દૈવેન મુક્તઃ સ ચ ગોપદાસ્યાદક્રૂરનીતો મથુરાં પ્રવિષ્ટઃ ।
કંસં નિહત્યાપિ હતાભિલાષસ્તત્રોગ્રસેનસ્ય બભૂવ દાસઃ ॥ ૨૨-૪॥

દૃષ્ટ્વા જરાસન્ધચમૂં ભયેન સ બન્ધુમિત્રો મથુરાં વિહાય ।
ધાવન્ કથઞ્ચિદ્બહુદુર્ગમાર્તઃ સ દ્વારકાદ્વીપપુરં વિવેશ ॥ ૨૨-૫॥

સ રુક્મિણીં જામ્બવતીં ચ ભામાં કન્યાસ્તથા દ્વ્યષ્ટસહસ્રમન્યાઃ ।
સમુદ્વહન્ સસ્મિતનર્મલાપઃ ક્રીડામૃગોઽભૂત્સતતં વધૂનામ્ ॥ ૨૨-૬॥

સ દસ્યુવૃત્તિસ્ત્રિદિવાજ્જહાર ભામાનિયુક્તઃ સુરપારિજાતમ્ ।
સત્યા ચ તં ગોવૃષવત્સરોષં બદ્ધ્વા તરૌ દુર્વચસાઽભ્યષિઞ્ચત્ ॥ ૨૨-૭॥

શ્રીનારદાયાતિથયે તયા સ દત્તોથ મુક્તો મુનિના ચ નીતઃ ।
તતસ્તયાઽસ્મૈ કનકં પ્રદાય પુનર્ગૃહીતસ્ત્રપયાઽઽપ મૌનમ્ ॥ ૨૨-૮॥

સૂતીગૃહાદ્ભીષ્મકજાસુતે સ પ્રદ્યુમ્નનામ્નીશ્વરિ શમ્બરેણ ।
હૃતે શિશૌ નિર્મથિતાભિમાન ઉચ્ચૈ રુદંસ્ત્વાં શરણં પ્રપન્નઃ ॥ ૨૨-૯ ॥

પુત્રાર્થિનીં જામ્બવતીમપુત્રાં સ તોષયિષ્યન્નુપમન્યુશિષ્યઃ ।
મુણ્ડી ચ દણ્ડી ચ શિવસ્ય શૈલે મન્ત્રં જપન્ ઘોરતપશ્ચકાર ॥ ૨૨-૧૦ ॥

વરેણ ભર્ગસ્ય દશાત્મજાન્ સા પ્રાસૂત સર્વા દયિતાશ્ચ શૌરેઃ ।
તથૈવ લબ્ધ્વા સ સુતાયુતાનિ સુખં ન લેભે નિજકર્મદોષાત્ ॥ ૨૨-૧૧ ॥

શાપાદૃષીણાં ધૃતરાષ્ટ્રપત્ન્યાશ્ચાન્યોન્યવૈરેણ કૃતાહવેષુ ।
સર્વે હતા હન્ત કુલં યદૂનાં મહત્પ્રદગ્ધં વનમગ્નિનેવ ॥ ૨૨-૧૨ ॥

વ્યાધેષુવિદ્ધો મૃતિમાપ કૃષ્ણઃ કુશસ્થલી ચાબ્ધિજલાપ્લુતાઽભૂત્ ।
હા જહ્રિરે દસ્યુભિરેનસાઽષ્ટાવક્રસ્ય શાપેન યદુસ્ત્રિયશ્ચ ॥ ૨૨-૧૩ ॥

એવં હરિઃ કર્મફલાન્યભુઙ્ક્ત ન કોઽપિ મુચ્યેત ચ કર્મબન્ધાત્ ।
દુઃખં ત્વભક્તસ્ય સુદુસ્સહં સ્યાદ્ભક્તસ્ય તે તત્સુસહં ભવેચ્ચ ॥ ૨૨-૧૪ ॥

જાનાસ્યહં તે પદયોરભક્તો ભક્તો નુ કિં વેતિ ન ચૈવ જાને ।
ત્વં સર્વશક્તા કુરુ માં સુશક્તં સર્વત્ર ભૂયોઽપિ શિવે નમસ્તે ॥ ૨૨-૧૫ ॥

## ૨૩ ત્રયોવિંશદશકઃ - મહાલક્ષ્મ્યવતારઃ

રમ્ભસ્ય પુત્રો મહિષાસુરઃ પ્રાક્ તીવ્રૈસ્તપોભિર્દ્રુહિણાત્પ્રસન્નાત્ ।
અવધ્યતાં પુમ્ભિરવાપ્ય ધૃષ્ટો ન મે મૃતિઃ સ્યાદિતિ ચ વ્યચિન્તીત્ ॥ ૨૩-૧ ॥

સ ચિક્ષુરાદ્યૈરસુરૈઃ સમેતઃ શક્રાદિદેવાન્યુધિ પદ્મજં ચ ।
રુદ્રં ચ વિષ્ણું ચ વિજિત્ય નાકે વસન્ બલાદ્યજ્ઞહવિર્જહાર ॥ ૨૩-૨ ॥

ચિરં ભૃશં દૈત્યનિપીડિતાસ્તે દેવાઃ સમં પદ્મજશઙ્કરાભ્યામ્ ।
હરિં સમેત્યાસુરદૌષ્ટ્યમૂચૂસ્ત્વાં સંસ્મરન્ દેવિ મુરારિરાહ ॥ ૨૩-૩ ॥

સુરા વયં તેન રણેઽતિઘોરે પરાજિતા દૈત્યવરો બલિષ્ઠઃ ।
મત્તો ભૃશં પુમ્ભિરવધ્યભાવાન્ન નઃ સ્ત્રિયો યુદ્ધવિચક્ષણાશ્ચ ॥ ૨૩-૪ ॥

તેજોભિરેકા ભવતીહ નશ્ચેત્સૈવાસુરાન્ ભીમબલાન્નિહન્તા ।
યથા ભવત્યેતદરં તથૈવ સંપ્રાર્થયામોઽવતુ નો મહેશી ॥ ૨૩-૫ ॥

એવં હરૌ વક્તરિ પદ્મજાતાત્તેજોઽભવદ્રાજસરક્તવર્ણમ્ ।

શિવાદભૂત્તામસરૌપ્યવર્ણં નીલપ્રભં સાત્ત્વિકમચ્યુતાચ્ચ ॥ ૨૩-૬॥

તેજાંસ્યભૂવન્ વિવિધાનિ શક્રમુખામરેભ્યો મિષતોઽખિલસ્ય ।
સમ્યોગતસ્તાન્યચિરેણ માતઃ સ્ત્રીરૂપમષ્ટાદશહસ્તમાપુઃ ॥ ૨૩-૭॥

તત્તુ ત્વમાસીઃ શુભદે મહાલક્ષ્મ્યાખ્યા જગન્મોહનમોહનાઙ્ગી ।
ત્વં હ્યેવ ભક્તાભયદાનદક્ષા ભક્તદ્રુહાં ભીતિકરી ચ દેવિ ॥ ૨૩-૮॥

સદ્યસ્ત્વમુચ્ચૈશ્ચકૃષેઽટ્ટહાસં સુરાઃ પ્રહૃષ્ટા વસુધા ચકમ્પે ।
ચુક્ષોભ સિન્ધુર્ગિરયો વિચેલુર્દૈત્યશ્ચ મત્તો મહિષશ્ચુકોપ ॥ ૨૩-૯॥

ત્વાં સુન્દરીં ચારમુખાત્ સ દૈત્યો વિજ્ઞાય કામી વિસસર્જ દૂતમ્ ।
સ ચેશ્વરીં દૈત્યગુણાન્ પ્રવક્તા ત્વાં નેતુકામો વિફલોદ્યમોઽભૂત્ ॥ ૨૩-૧૦॥

પ્રલોભનૈસ્ત્વામથ દેવશક્તિં જ્ઞાત્વાઽપિ વાક્યૈરનુનેતુકામઃ ।
એકૈકશઃ પ્રેષયતિસ્મ દૂતાન્ ત્વાં કામિનીં કર્તુમિમે ન શેકુઃ ॥ ૨૩-૧૧॥

અવેહિ માં પુચ્છવિષાણહીનં ભારં વહન્તં મહિષં દ્વિપાદમ્ ।
હિંસન્તિ માં સ્વર્થિજનાસ્ત્વમેવ રક્ષાકરી મે શુભદે નમસ્તે ॥ ૨૩-૧૨॥

## ૨૪ ચતુર્વિંશદશકઃ - મહિષાસુરવધમ્ - દેવીસ્તુતિઃ

દેવિ ત્વયા બાષ્કલદુર્મુખાદિદૈત્યેષુ વીરેષુ રણે હતેષુ ।
સદ્વાક્યતસ્ત્વામનુનેતુકામો મોઘપ્રયત્નો મહિષશ્ચુકોપ ॥ ૨૪-૧॥

ત્વાં કામરૂપઃ ખુરપુચ્છશૃઙ્ગૈર્નાનાસ્ત્રશસ્ત્રૈશ્ચ ભૃશં પ્રહર્તા ।
ગર્જન્ વિનિન્દન્ પ્રહસન્ ધરિત્રીં પ્રકમ્પયંશ્ચાસુરરાડ્યુયોધ ॥ ૨૪-૨॥

જપારુણાક્ષી મધુપાનતુષ્ટા ત્વં ચારિણાઽરેર્મહિષસ્ય કણ્ઠમ્ ।
છિત્વા શિરો ભૂમિતલે નિપાત્ય રણાઙ્ગણસ્થા વિબુધૈઃ સ્તુતાઽભૂઃ ॥ ૨૪-૩॥

માતસ્ત્વયા નો વિપદો નિરસ્તા અશક્યમન્યૈરિદમદ્ભુતાઙ્ગિ ।
બ્રહ્માણ્ડસર્ગસ્થિતિનાશકર્ત્રીં કસ્ત્વાં જયેત્ કેન કથં કુતો વા ॥ ૨૪-૪॥

વિદ્યાસ્વરૂપાઽસિ મહેશિ યસ્મિન્ સ વૈ પરેષાં સુખદઃ કવિશ્ચ ।
ત્વં વર્તસે યત્ર સદાઽપ્યવિદ્યાસ્વરૂપિણી સ ત્વધમઃ પશુઃ સ્યાત્ ॥ ૨૪-૫॥

કૃપાકટાક્ષાસ્તવ દેવિ યસ્મિન્ પતન્તિ તસ્યાત્મજવિત્તદારાઃ ।
યચ્છન્તિ સૌખ્યં ન પતન્તિ યસ્મિન્ ત એવ દુઃખં દદતેઽસ્ય નૂનમ્ ॥ ૨૪-૬॥

પશ્યામ નિત્યં તવ રૂપમેતત્કથાશ્ચ નામાનિ ચ કીર્તયામ ।
નમામ મૂર્ધ્ના પદપઙ્કજે તે સ્મરામ કારુણ્યમહાપ્રવાહમ્ ॥ ૨૪-૭॥

ત્વમેવ માતાઽસિ દિવૌકસાં નો નાન્યા દ્વિતીયા હિતદાનદક્ષા ।
અન્યે સુતા વા તવ સન્તિ નો વા ન રક્ષિતા નસ્ત્વદૃતે મહેશિ ॥ ૨૪-૮॥

ક્વ ત્વં વયં ક્વેતિ વિચિન્ત્ય સર્વં ક્ષમસ્વ નો દેવ્યપરાધજાલમ્ ।
યદા યદા નો વિપદો ભવન્તિ તદા તદા પાલય પાલયાસ્માન્ ॥ ૨૪-૯॥

ઇતિ સ્તુવત્સુ ત્રિદશેષુ સદ્યઃ કૃપાશ્રુનેત્રૈવ તિરોદધાથ ।
તતો જગદ્દેવિ વિભૂતિપૂર્ણં બભૂવ ધર્મિષ્ઠસમસ્તજીવમ્ ॥ ૨૪-૧૦॥

ત્વાં સંસ્મરેયં ન ચ વા સ્મરેયં વિપત્સુ મા વિસ્મર માં વિમૂઢમ્ ।
રુદન્ બિડાલાર્ભકવન્ન કિઞ્ચિચ્છક્નોમિ કર્તું શુભદે નમસ્તે ॥ ૨૪-૧૧॥

## ૨૫ પઞ્ચવિંશદશકઃ - મહાસરસ્વત્યવતારઃ

સુમ્ભાદિવધમ્

અથામરાઃ શત્રુવિનાશતૃપ્તાશ્ચિરાય ભક્ત્યા ભવતીં ભજન્તઃ ।
મન્દીભવદ્ભક્તિહૃદઃ ક્રમેણ પુનશ્ચ દૈત્યાભિભવં સમીયુઃ ॥ ૨૫-૧॥

સુમ્ભો નિસુમ્ભશ્ચ સહોદરૌ સ્વૈઃ પ્રસાદિતાત્પદ્મભવાત્તપોભિઃ ।
સ્ત્રીમાત્રવધ્યત્વમવાપ્ય દેવાન્ જિત્વા રણેઽધ્યૂષતુરૈન્દ્રલોકમ્ ॥ ૨૫-૨॥

ભ્રષ્ટશ્રિયસ્તે તુ ગુરૂપદેશાદ્ધિમાદ્રિમાપ્તા નુનુવુઃ સુરાસ્ત્વામ્ ।
તેષાં પુરશ્ચાદ્રિસુતાઽઽવિરાસીત્સ્નાતું ગતા સા કિલ દેવનદ્યામ્ ॥ ૨૫-૩॥

તદ્દેહકોશાત્ત્વમજા પ્રજાતા યતઃ પ્રસિદ્ધા ખલુ કૌશિકીતિ ।
મહાસરસ્વત્યભિધાં દધાના ત્વં રાજસીશક્તિરિતીર્યસે ચ ॥ ૨૫-૪॥

હિમાદ્રિશ◌ૃઙ્ગેષુ મનોહરાઙ્ગી સિંહાધિરૂઢા મૃદુગાનલોલા ।
શ્રોત્રાણિ નેત્રાણ્યપિ દેહભાજાં ચકર્ષિથાષ્ટાદશબાહુયુક્તા ॥ ૨૫-૫॥

વિજ્ઞાય સુમ્ભઃ કિલ દૂતવાક્યાત્ત્વાં મોહનાઙ્ગીં દયિતાં ચિકીર્ષુઃ ।
ત્વદન્તિકે પ્રેષયતિસ્મ દૂતાનેકૈકશઃ સ્નિગ્ધવચોવિલાસાન્ ॥ ૨૫-૬॥

ત્વાં પ્રાપ્ય તે કાલિકયા સમેતામેકૈકશઃ સુમ્ભગુણાન્ પ્રભાષ્ય ।
પત્ની ભવાસ્યેતિ કૃતોપદેશાસ્તત્પ્રાતિકુલ્યાત્કુપિતા બભૂવુઃ ॥ ૨૫-૭॥

સુમ્ભાજ્ઞયા ધૂમ્રવિલોચનાખ્યો રણોદ્યતઃ કાલિકયા હતોઽભૂત્ ।

ચણ્ડં ચ મુણ્ડં ચ નિહત્ય કાલી ત્વત્ફાલજા તદ્રુધિરં પપૌ ચ ॥ ૨૫-૮॥

ચામુણ્ડિકેતિ પ્રથિતા તતઃ સા ત્વાં રક્તબીજોઽથ યુયુત્સુરાપ ।
યદ્રક્તબિન્દૂદ્ભવરક્તબીજસઙ્ઘૈર્જગદ્વ્યાપ્તમભૂદશેષમ્ ॥ ૨૫-૯॥

બ્રહ્મેન્દ્રપાશ્યાદિકદેવશક્તિકોટ્યો રણં ચક્રુરરાતિસઙ્ઘૈઃ ।
તત્સઙ્ગરં વર્ણયિતું ન શક્તઃ સહસ્રજિહ્વોઽપિ પુનઃ કિમન્યે ॥ ૨૫-૧૦॥

રણેઽતિઘોરે વિવૃતાનના સા કાલી સ્વજિહ્વાં ખલુ ચાલયન્તી ।
ત્વચ્છસ્ત્રકૃત્તાખિલરક્તબીજરક્તં પપૌ ગર્જનભીતદૈત્યા ॥ ૨૫-૧૧॥

ત્વયા નિસુમ્ભસ્ય શીરો નિકૃત્તં સુમ્ભસ્ય તત્કાલિકયાઽપિ ચાન્તે ।
અન્યેઽસુરાસ્ત્વાં શિરસા પ્રણમ્ય પાતાલમાપુસ્ત્વદનુગ્રહેણ ॥ ૨૫-૧૨॥

હતેષુ દેવા રિપુષુ પ્રણમ્ય ત્વાં તુષ્ટુવુઃ સ્વર્ગમગુઃ પુનશ્ચ ।
તે પૂર્વવદ્યજ્ઞહવિર્હરન્તો ભૂમાવવર્ષન્ જહૃષુશ્ચ મર્ત્યાઃ ॥ ૨૫-૧૩॥

માતર્મદીયે હૃદિ સન્તિ દમ્ભદર્પાભિમાનાદ્યસુરા બલિષ્ઠાઃ ।
નિહત્ય તાન્ દેહ્યભયં સુખં ચ ત્વમેવ માતા મમ તે નમોઽસ્તુ ॥ ૨૫-૧૪॥

## ૨૬ ષડ્વિંશદશકઃ - સુરથકથા

રાજા પુરાઽઽસિત્ સુરથાભિધાનઃ સ્વારોચિષે ચૈત્રકુલાવતંસઃ ।
મન્વન્તરે સત્યરતો વદાન્યઃ સમ્યક્પ્રજાપાલનમાત્રનિષ્ઠઃ ॥ ૨૬-૧॥

વીરોઽપિ દૈવાત્સમરે સ કોલાવિધ્વંસિભિઃ શત્રુબલૈર્જિતઃ સન્ ।
ત્યક્ત્વા સ્વરાજ્યં વનમેત્ય શાન્તં સુમેધસં પ્રાપ મુનિં શરણ્યમ્ ॥ ૨૬-૨॥

તપોવનં નિર્ભયમાવસન્દ્રુમચ્છાયાશ્રિતઃ શીતલવાતપૃક્તઃ ।
સ એકદા રાજ્યગૃહાદિચિન્તાપર્યાકુલઃ કઞ્ચિદપશ્યદાર્તમ્ ॥ ૨૬-૩॥

રાજા તમૂચે સુરથોઽસ્મિ નામ્ના જિતોઽરિભિર્ભ્રષ્ટવિભૂતિજાલઃ ।
ગૃહાદિચિન્તામથિતાન્તરઙ્ગઃ કુતોઽસિ કસ્ત્વં વદ માં સમસ્તમ્ ॥ ૨૬-૪॥

શ્રુત્વેતિ સ પ્રત્યવદત્સમાધિનામાઽસ્મિ વૈશ્યો હૃતસર્વવિત્તઃ ।
પત્નીસુતાદ્યૈઃ સ્વગૃહાન્નિરસ્તસ્તથાઽપિ સોત્કણ્ઠમિમાન્ સ્મરામિ ॥ ૨૬-૫॥

અનેન સાકં સુરથો વિનીતો મુનિં પ્રણમ્યાહ સમધિનામા ।
ગૃહાન્નિરસ્તોઽપિ ગૃહાદિચિન્તાં કરોતિ સોત્કણ્ઠમયં મહર્ષે ॥ ૨૬-૬॥

બ્રહ્મૈવ સત્યં પરમદ્વિતીયં મિથ્યા જગત્સર્વમિદં ચ જાને ।
તથાऽપિ માં બાધત એવ રાજ્યગૃહાદિચિન્તા વદ તસ્ય હેતુમ્ ॥ ૨૬-૭॥

ઊચે તપસ્વી શ‍ૃણુ ભૂપ માયા સર્વસ્ય હેતુઃ સગુણાऽગુણા સા ।
બન્ધં ચ મોક્ષં ચ કરોતિ સૈવ સર્વેऽપિ માયાવશગા ભવન્તિ ॥ ૨૬-૮॥

જ્ઞાનં હરેરસ્તિ વિધેશ્ચ કિન્તુ ક્વચિત્કદાચિન્મિલિતૌ મિથસ્તૌ ।
વિમોહિતૌ કસ્ત્વમરે નુ કસ્ત્વમેવં વિવાદં કિલ ચક્રતુઃ સ્મ ॥ ૨૬-૯॥

જ્ઞાનં દ્વિધૈકં ત્વપરોક્ષમન્યત્પરોક્ષમપ્યેતદવેહિ રાજન્ ।
આદ્યં મહેશ્યાઃ કૃપયા વિરક્ત્યા ભક્ત્યા મહત્સઙ્ગમતશ્ચ લભ્યમ્ ॥ ૨૬-૧૦॥

ય એતદાપ્નોતિ સ સર્વમુક્તો દ્વેષશ્ચ રાગશ્ચ ન તસ્ય ભૂપ ।
જ્ઞાનં દ્વિતીયં ખલુ શાસ્ત્રવાક્યવિચારતો બુદ્ધિમતૈવ લભ્યમ્ ॥ ૨૬-૧૧॥

શમાદિહીનો ન ચ શાસ્ત્રવાક્યવિચારમાત્રેણ વિમુક્તિમેતિ ।
દેવ્યાઃ કટાક્ષૈર્લભતે ચ ભુક્તિં મુક્તિં ચ સા કેવલભક્તિગમ્યા ॥ ૨૬-૧૨॥

સમ્પૂજ્ય તાં સાકમનેન દુર્ગાં કૃત્વા પ્રસન્નાં સ્વહિતં લભસ્વ ।
શ્રુત્વા મુનેર્વાક્યમુભૌ મહેશિ ત્વાં પૂજયામાસતુરિદ્ધભક્ત્યા ॥ ૨૬-૧૩॥

વર્ષદ્વયાન્તે ભવતીં સમીક્ષ્ય સ્વપ્ને સતોષાવપિ તાવતૃપ્તૌ ।
દિદૃક્ષયા જાગ્રતિ ચાપિ ભક્તાવાચેરતુર્દ્રૌ કઠિનવ્રતાનિ ॥ ૨૬-૧૪॥

વર્ષત્રયાન્તે સુમુખીં પ્રસન્નાં ત્વાં વીક્ષ્ય તૌ તુષ્ટુવતુઃ પ્રહૃષ્ટૌ ।
દૈવાત્સમાધિસ્ત્વદનુગ્રહેણ લબ્ધ્વા પરં જ્ઞાનમવાપ મુક્તિમ્ ॥ ૨૬-૧૫॥

ભોગાવિરક્તઃ સુરથસ્તુ શીઘ્રં નિષ્કણ્ટકં રાજ્યમવાપ ભૂયઃ ।
મન્વન્તરે ભૂપતિરષ્ટમે સ સાવર્ણિનામા ચ મનુર્બભૂવ ॥ ૨૬-૧૬॥

ત્વં ભુક્તિકામાય દદાસિ ભોગં મુમુક્ષવે સંસૃતિમોચનં ચ ।
કિઞ્ચિન્ન પૃચ્છામિ પરં વિમૂઢો નમામિ તે પાદસરોજયુગ્મમ્ ॥ ૨૬-૧૭॥

## ૨૭ સપ્તવિંશદશકઃ - શતાક્ષ્યવતારઃ

દૈત્યઃ પુરા કશ્ચન દુર્ગમાખ્યઃ પ્રસાદિતાત્પદ્મભવાત્તપોભિઃ ।
અવૈદિકં વૈદિકમપ્યગૃહ્ણાન્મન્ત્રં સમસ્તં દિવિષજ્જયૈષી ॥ ૨૭-૧॥

વેદે ગૃહીતે દિતિજેન વિપ્રાઃ શ્રુતિસ્થિરા વિસ્મૃતવેદમન્ત્રાઃ ।
સાન્ધ્યાનિ કર્માણ્યપિ નૈવ ચક્રુઃ ક્ષિતિસ્ત્વવેદાધ્યયના બભૂવ ॥ ૨૭-૨॥

હૃતેષુ મન્ત્રેષ્વખિલેષુ પૂજાયજ્ઞાદિ ભૂમૌ ન કૃતં મનુષ્યૈઃ ।
સુરા અશક્તાસ્તદલાભખિન્ના દૈત્યેન યુદ્ધે બલિના જિતાશ્ચ ॥ ૨૭-૩॥

ત્યક્ત્વા દિવં તે ગિરિગહ્વરેષુ નિલીય વર્ષાણિ બહૂનિ નિન્યુઃ ।
વૃષ્ટેરભાવાદ્ધરણી ચ શુષ્કજલાશયા તર્ષનિપીડિતાઽભૂત્ ॥ ૨૭-૪॥

સર્વે તૃષાર્તાશ્ચ હિમાદ્રિમેત્ય ત્વાં ધ્યાનપૂજાનુતિભિર્ભજન્તઃ ।
પ્રસાદયામાસુરનેકકોટિબ્રહ્માણ્ડકર્ત્રીમખિલાર્તિહન્ત્રીમ્ ॥ ૨૭-૫॥

દૃષ્ટ્વા દયાર્દ્રાક્ષિશતા ત્વમેભિઃ કૃપાશ્રુવર્ષૈર્નવરાત્રમુર્વ્યામ્ ।
જલાશયાન્પૂર્ણજલાંશ્ચકર્થ જનાઃ શતાક્ષીત્યભિધાં દદુસ્તે ॥ ૨૭-૬॥

ક્ષુત્પીડિતાનાં ચ ચરાચરાણાં સર્વત્ર નાનાવિધમન્નમિષ્ટમ્ ।
સ્વાદૂનિ મૂલાનિ ફલાનિ ચાદાઃ શાકમ્ભરીતિ પ્રથિતા તતોઽભૂઃ ॥ ૨૭-૭॥

દૈત્યસ્તુ વિજ્ઞાય સમસ્તમસ્ત્રશસ્ત્રૈઃ સસૈન્યઃ પ્રહરન્ વપુસ્તે ।
રણાઙ્ગણે સાયકવિદ્ધગાત્રઃ સશબ્દમુર્વ્યાં તરુવત્પપાત ॥ ૨૭-૮॥

સ ચાસુરાત્મા ખલુ વેદમન્ત્રાન્ ચિરં પઠંસ્ત્વામભિવીક્ષમાણઃ ।
ગતાયુરાવિશ્ય પરાત્મનિ ત્વય્યવાપ મુક્તિં મિષતાં સુરાણામ્ ॥ ૨૭-૯॥

વેદાન્હૃતાનબ્જભવાનને ત્વં પુનશ્ચ નિક્ષિપ્ય જગત્સુરક્ષામ્ ।
કૃત્વા નુતા દેવગણૈર્નરૈશ્ચ તુષ્ટા તિરોઽભૂઃ કરુણાર્દ્રનેત્રા ॥ ૨૭-૧૦॥

ભક્તસ્ય વૈ દુર્ગતિનાશિની ત્વં સુખપ્રદા દુર્ગમહન્ત્રિ માતઃ ।
દુર્ગેતિ નામ્ના વિદિતા ચ લોકે વિચિત્રરૂપાસ્તવ દેવિ લીલાઃ ॥ ૨૭-૧૧॥

કોઽપ્યસ્તિ ચિત્તે મમ દુર્ગમોઽયં જ્ઞાતસ્ત્વયા નૈવ મયા તુ દેવિ ।
યઃ સન્તતં દ્રુહ્યતિ મે તમાશુ સંહૃત્ય માં રક્ષ નમો નમસ્તે ॥ ૨૭-૧૨॥

## ૨૮ અષ્ટાવિંશદશકઃ - શક્ત્યવમાનદોષઃ

હાલાહલાખ્યાનસુરાન્ પુરા તુ નિજઘ્નતુર્વિષ્ણુહરૌ રણાન્તે ।
સ્વેનૈવ વીર્યેણ જયોઽયમેવં તૌ મોહિતૌ દર્પમવાપતુશ્ચ ॥ ૨૮-૧॥

તતો વિધિસ્તૌ તરુવદ્વિચેષ્ટૌ તેજોવિહીનાવભિવીક્ષ્ય ભીતઃ ।
નિમીલિતાક્ષઃ સકલં વિચિન્ત્ય જાનન્ સુતાન્ દક્ષમુખાનુવાચ ॥ ૨૮-૨॥

પુત્રા હરિં પશ્યત ધૂર્જટિં ચ યૌ નષ્ટશક્તી ખલુ શક્તિકોપાત્ ।

તતો જગદ્ભારયુતોઽસ્મિ યૂયં શક્તિં તપોભિઃ કુરુત પ્રસન્નામ્ ॥ ૨૮-૩॥

શક્તેઃ પ્રસાદેન હિ પૂર્વવત્તૌ સ્યાતાં યશોવૃદ્ધિરનેન વઃ સ્યાત્ ।
શક્તિશ્ચ યત્રાવતરત્યમોઘમેતત્કુલં યાતિ કૃતાર્થતાં ચ ॥ ૨૮-૪॥

શક્તેઃ કટાક્ષૈર્જગતોઽસ્તુ ભદ્રમેવં નિશમ્યાશુ હિમાદ્રિમેત્ય ।
દક્ષાદયો ધ્યાનજપાદિભિસ્ત્વામારાધ્ય ભક્ત્યાઽબ્દશતાનિ નિન્યુઃ ॥ ૨૮-૫॥

દૃષ્ટા પુરસ્તૈસ્તુ નુતા ત્વમાત્થ ભીત્યાલમાર્ત્યા ચ હિતં દદામિ ।
ગૌરી ચ લક્ષ્મીશ્ચ મમૈવ શક્તી તે શમ્ભવે પ્રાગ્ હરયે ચ દત્તે ॥ ૨૮-૬॥

તૌ શક્તિસાહાય્યત એવ દૈત્યાન્નિજઘ્નતુઃ સત્યમિદં તુ તાભ્યામ્ ।
હા વિસ્મૃતં શક્ત્યવમાનદોષાદ્વિનષ્ટશક્તી ખલુ તાવભૂતામ્ ॥ ૨૮-૭॥

તૌ પૂર્વવત્સ્તામિહ શક્તિરેકા જાયેત દક્ષસ્ય કુલે મદીયા ।
ક્ષીરાબ્ધિતોઽન્યા ચ પુરારિરાદ્યાં ગૃહ્ણાતુ પશ્ચાદિતરાં ચ વિષ્ણુઃ ॥ ૨૮-૮॥

સર્વે સ્વશક્તિં પરિપૂજ્ય માયાબીજાદિમન્ત્રાન્વિધિવજ્જપન્તઃ ।
વિરાટ્સ્વરૂપં મમ રૂપમેતત્સચ્ચિત્સ્વરૂપં ચ સદા સ્મરેત ॥ ૨૮-૯॥

પ્રયાત તુષ્ટા જગતાં શુભં સ્યાદેવં ત્વમાભાષ્ય તિરોદધાથ ।
કારુણ્યતસ્તે ગિરિશો હરિશ્ચ શક્તાવભૂતાં નિજકર્મ કર્તુમ્ ॥ ૨૮-૧૦॥

માતઃ કટાક્ષા મયી તે પતન્તુ મા માઽસ્તુ મે શક્ત્યવમાનપાપમ્ ।
સર્વાન્સ્વધર્માન્ કરવાણ્યભીતો ભદ્રં મમ સ્યાત્સતતં નમસ્તે ॥ ૨૮-૧૧॥

## ૨૯ એકોનત્રિંશદશકઃ - દેવીપીઠોત્પત્તિઃ

અથૈકદાઽદૃશ્યત દક્ષગેહે શાક્તં મહસ્તચ્ચ બભૂવ બાલા ।
વિજ્ઞાય તે શક્તિમિમાં જગત્સુ સર્વેઽપિ હૃષ્ટા અભવન્ ક્ષણશ્ચ ॥ ૨૯-૧॥

દક્ષઃ સ્વગેહાપતિતાં ચકાર નામ્ના સતીં પોષયતિ સ્મ તાં સઃ ।
સ્મરન્ વચસ્તે ગિરિશાય કાલે પ્રદાય તાં દ્વૌ સમતોષયચ્ચ ॥ ૨૯-૨॥

એવં શિવઃશક્તિયુતઃ પુનશ્ચ બભૂવ ગચ્છત્સુ દિનેષુ દક્ષઃ ।
દૈવાચ્છિવદ્વેષમવાપ દેહં તત્પોષિતં સ્વં વિજહૌ સતી ચ ॥ ૨૯-૩॥

દુઃખેન કોપેન ચ હા સતીતિ મુહુર્વદન્નુદ્ધૃતદારદેહઃ ।
બભ્રામ સર્વત્ર હરઃ સુરેષુ પશ્યત્સુ શાર્ઙ્ગી શિવમન્વચારીત્ ॥ ૨૯-૪॥

રુદ્રાંસવિન્યસ્તસતીશરીરં વિષ્ણુઃ શરૌઘૈર્બહુશશ્ચકર્ત ।
એકૈકશઃ પેતુરમુષ્ય ખણ્ડા ભૂમૌ શિવે સાષ્ટશતં સ્થલેષુ ॥ ૨૯-૫॥

યતો યતઃ પેતુરિમે સ્થલાનિ સર્વાણિ તાનિ પ્રથિતાનિ લોકે ।
ઇમાનિ પૂતાનિ ભવાનિ દેવીપીઠાનિ સર્વાઘહરાણિ ભાન્તિ ॥ ૨૯-૬॥

ત્વમેકમેવાદ્વયમત્ર ભિન્નનામાનિ ધૃત્વા ખલુ મન્ત્રતન્ત્રૈઃ ।
સમ્પૂજ્યમાના શરણાગતાનાં ભુક્તિં ચ મુક્તિં ચ દદાસિ માતઃ ॥ ૨૯-૭॥

નિર્વિણ્ણચિત્તઃ સ સતીવિયોગાચ્છિવઃ સ્મરંસ્ત્વાં ક્વચિન્નિષણ્ણઃ ।
સમાધિમગ્નોઽભવદેષ લોકઃ શક્તિં વિના હા વિરસોઽલસશ્ચ ॥ ૨૯-૮॥

ચિન્તાકુલા મોહધિયો વિશીર્ણતોષા મહારોગનિપીડિતાશ્ચ ।
સૌભાગ્યહીના વિહતાભિલાષાઃ સર્વે સદોદ્વિગ્નહૃદો બભૂવુઃ ॥ ૨૯-૯॥

શિવોઽપિ શક્ત્યા સહિતઃ કરોતિ સર્વં વિયુક્તશ્ચ તયા જડઃ સ્યાત્ ।
મા માઽસ્તુ મે શક્તિવિયોગ એષ દાસોઽસ્મિ ભૂયો વરદે નમસ્તે ॥ ૨૯-૧૦॥

## ૩૦ ત્રિંશદશકઃ - શ્રીપાર્વત્યવતારઃ

સમાધિમગ્ને ગિરિશે વિરિઞ્ચાત્તપઃપ્રસન્નાત્કિલ તારકાખ્યઃ ।
દૈત્યો વરં પ્રાપ્ય વિજિત્ય દેવાન્ સબાન્ધવઃ સ્વર્ગસુખાન્યભુઙ્ક્ત ૧ ॥

વરૈઃ સ ભર્ગૌરસપુત્રમાત્રવધ્યત્વમાપ્તોઽસ્ય ચ પત્ન્યભાવાત્ ।
સર્વાધિપત્યં સ્વબલં ચ મોહાન્મત્તો ભૃશં શાશ્વતમેવ મેને ॥ ૩૦-૨॥

નષ્ટાખિલાઃ શ્રીહરયે સુરાસ્તે નિવેદયામાસુરશેષદુઃખમ્ ।
સ ચાહ દેવા અનયેન નૂનમુપેક્ષતે નો જનની કૃપાર્દ્રા ॥ ૩૦-૩॥

તદ્વિસ્મૃતેર્જાતમિદં કરેણ યષ્ટ્યા ચ યા તાડયતિ સ્વપુત્રમ્ ।
તામેવ બાલઃ સ નિજેષ્ટદાત્રીં સાસ્રં રુદન્માતરમભ્યુપૈતિ ॥ ૩૦-૪॥

માતા હિ નઃ શક્તિરિમાં પ્રસન્નાં કુર્યામ ભક્ત્યા તપસા ચ શીઘ્રમ્ ।
સર્વાપદઃ સૈવ હરિષ્યતીતિ શ્રુત્વામરાસ્ત્વાં નુનુવુર્મહેશિ ॥ ૩૦-૫॥

નિશમ્ય તેષાં શ્રુતિવાક્યગર્ભસ્તુતિં પ્રસન્ના વિબુધાંસ્ત્વમાત્થ ।
અલં વિષાદેન સુરાઃ સમસ્તં જાને હરિષ્યામિ ભયં દ્રુતં વઃ ॥ ૩૦-૬॥

હિમાદ્રિપુત્રી વિબુધાસ્તદર્થં જાયેત ગૌરી મમ શક્તિરેકા ।
સા ચ પ્રદેયા વૃષભધ્વજાય તયોઃ સુતસ્તં દિતિજં ચ હન્યાત્ ॥ ૩૦-૭॥

ઇત્થં નિશમ્યાસ્તભયેષુ દેવેષ્વભ્યર્થિતા દેવિ હિમાચલેન ।
ત્વં વર્ણયન્તી નિજતત્ત્વમેભ્યઃ પ્રદર્શયામાસિથ વિશ્વરૂપમ્ ॥ ૩૦-૮॥

સહસ્રશીર્ષં ચ સહસ્રવક્ત્રં સહસ્રકર્ણં ચ સહસ્રનેત્રમ્ ।
સહસ્રહસ્તં ચ સહસ્રપાદમનેકવિદ્યુત્પ્રભમુજ્જ્વલં ચ ॥ ૩૦-૯॥

દૃષ્ટ્વેદમીશ્વર્યખિલૈર્ભિયોક્તા ત્વં ચોપસંહૃત્ય વિરાટ્સ્વરૂપમ્ ।
કૃપાવતી સ્મેરમુખી પુનશ્ચ નિવૃત્તિમાર્ગં ગિરયે ન્યગાદીઃ ॥ ૩૦-૧૦॥

ઉક્ત્વાઽખિલં સંસૃતિમુક્તિમાર્ગં સુરેષુ પશ્યત્સુ તિરોદધાથ ।
શ્રુત્વાઽદ્રિમુખ્યાસ્તવ ગીતમુચ્ચૈર્દેવા જપધ્યાનપરા બભૂવુઃ ॥ ૩૦-૧૧॥

અથૈકદા પ્રાદુરભૂદ્ધિમાદ્રૌ શાક્તં મહો દક્ષગૃહે યથા પ્રાક્ ।
ક્રમેણ તદ્દેવિ બભૂવ કન્યા સા પાર્વતીતિ પ્રથિતા જગત્સુ ॥ ૩૦-૧૨॥

હિમાદ્રિણૈષા ચ હરાય દત્તા તયોઃ સુતઃ સ્કન્દ ઇતિ પ્રસિદ્ધઃ ।
સ તારકાખ્યં દિતિજં નિહત્ય રરક્ષ લોકાનખિલાન્ મહેશિ ॥ ૩૦-૧૩॥

દુર્વાસસઃ શાપબલેન શક્રો નષ્ટાખિલશ્રીર્વચનેન વિષ્ણોઃ ।
ક્ષીરોદધિં સાસુરદેવસઙ્ઘો મમન્થ તસ્માદુદભૂચ્ચ લક્ષ્મીઃ ॥ ૩૦-૧૪॥

યા પૂજિતેન્દ્રેણ રમા તવૈકા શક્તિઃ સ્વરૈશ્વર્યપુનઃપ્રદાનાત્ ।
શાપાન્મુનેર્દેવગણાન્વિમોચ્ય કટાક્ષતસ્તે હરિમાપ ભૂયઃ ॥ ૩૦-૧૫॥

ત્વં સર્વશક્તિર્ન જિતાઽસિ કેનાપ્યન્યાન્ જયસ્યેવ સદા શરણ્યા ।
માતેવ પત્નીવ સુતેવ વા ત્વં વિભાસિ ભક્તસ્ય નમો નમસ્તે ॥ ૩૦-૧૬॥

## ૩૧ એકત્રિંશદશકઃ - ભ્રામર્યવતારઃ

કશ્ચિત્પુરા મન્ત્રમુદીર્ય ગાયત્રીતિ પ્રસિદ્ધં દિતિજોઽરુણાખ્યઃ ।
ચિરાય કૃત્વા તપ આત્મયોનેઃ પ્રસાદિતાદાપ વરાનપૂર્વાન્ ॥ ૩૧-૧॥

સ્ત્રીપુમ્ભિરસ્ત્રૈશ્ચ રણે દ્વિપાદૈશ્ચતુષ્પદૈશ્ચાપ્યુભયાત્મકૈશ્ચ ।
અવધ્યતાં દેવપરાજયં ચ લબ્ધ્વા સ દૃપ્તો દિવમાસસાદ ॥ ૩૧-૨॥

રણે જિતા દૈત્યભયેન લોકપાલૈઃ સહ સ્વસ્વપદાનિ હિત્વા ।
દેવા દ્રુતાઃ પ્રાપ્ય શિવં રિપૂણાં સંયગ્વધોપાયમચિન્તયંશ્ચ ॥ ૩૧-૩॥

તદાઽભવત્કાપ્યશરીરિણી વાગ્ભજેત દેવીં શુભમેવ વઃ સ્યાત્ ।

દૈત્યોઽરુણો વર્ધયતીહ ગાયત્ર્યુપાસનેનાત્મબલં ત્વધૃષ્યમ્ ॥ ૩૧-૪॥

યદ્યેષ તં મન્ત્રજપં જહાતિ સ દુર્બલઃ સાધ્યવધોઽપિ ચ સ્યાત્ ।
એવં નિશમ્ય ત્રિદશૈઃ પ્રહૃષ્ટૈરભ્યર્થિતો દેવગુરુઃ પ્રતસ્થે ॥ ૩૧-૫॥

સ પ્રાપ દૈત્યં યતિરૂપધારી પ્રત્યુદ્ગતો મન્ત્રજપાતિસક્તમ્ ।
સ્મિતાર્દ્રમૂચે કુશલી સબન્ધુમિત્રો ભવાન્ કિં જગદેકવીર ॥ ૩૧-૬॥

દૈત્યસ્ય તે મન્ત્રજપેન કિં યો નૂનં બલિષ્ઠં ત્વબલં કરોતિ ।
યેનૈવ દેવા અબલા રણેષુ ત્વયા જિતાસ્ત્વં સ્વહિતં કુરુષ્વ ॥ ૩૧-૭॥

સંન્યાસિનો મન્ત્રજપેન રાગદ્વેષાદિ જેતું સતતં યતન્તે ।
ન ત્વં યતિર્નાપિ મુમુક્ષુરર્થકામાતિસક્તસ્ય જપેન કિં તે ॥ ૩૧-૮॥

એકં હિ મન્ત્રં સમુપાસ્વહે દ્વૌ તેનાસિ મિત્રં મમ તદ્વદામિ ।
મન્ત્રશ્ચ મે મુક્તિદ એવ તુભ્યં વૃદ્ધિં ન દદ્યાદયમિત્યવેહિ ॥ ૩૧-૯॥

બૃહસ્પતાવેવમુદીર્ય યાતે સત્યં તદુક્તં દિતિજો વિચિન્ત્ય ।
ક્રમાજ્જહૌ મન્ત્રજપં સદા હિ મૂઢઃ પરપ્રોક્તવિનેયબુદ્ધિઃ ॥ ૩૧-૧૦॥

એવં ગુરૌ કુર્વતિ દૈત્યભીતૈઃ કૃત્વા તપોયોગજપાધ્વરાદિ ।
જામ્બૂનદેશ્વર્યમરૈઃ સ્તુતા ત્વં પ્રસાદિતા પ્રાદુરભૂઃ કૃપાર્દ્રા ॥ ૩૧-૧૧॥

ત્વદ્દેહજાતૈર્ભ્રમરૈરનન્તૈર્દૈત્યઃ સસૈન્યો વિફલાસ્ત્રશસ્ત્રઃ ।
દષ્ટો હતસ્ત્વં ચ નુતિપ્રસન્ના પશ્યત્સુ દેવેષુ તિરોહિતાઽભૂઃ ॥ ૩૧-૧૨॥

સ્વદેહતો વૈ ભ્રમરાન્ વિધાત્રી ત્વં ભ્રામરીતિ પ્રથિતા જગત્સુ ।
અહો વિચિત્રાસ્તવ દેવિ લીલાઃ નમો નમસ્તે ભુવનેશિ માતઃ ॥ ૩૧-૧૩॥

## ૩૨ દ્વાત્રિંશદશકઃ - યક્ષકથા

પુરા સુરા વર્ષશતં રણેષુ નિરન્તરેષુ ત્વદનુગ્રહેણ ।
વિજિત્ય દૈત્યાન્ જનનીમપિ ત્વાં વિસ્મૃત્ય દૃપ્તા નિતરાં બભૂવુઃ ॥ ૩૨-૧॥

મયૈવ દૈત્યા બલવત્તરેણ હતા ન ચાન્યૈરિતિ શક્રમુખ્યાઃ ।
દેવા અભૂવન્નતિદર્પવન્તસ્ત્વં દેવિ ચાન્તઃ કુરુષે સ્મ હાસમ્ ॥ ૩૨-૨॥

તચ્ચિત્તદર્પાસુરનાશનાય તેજોમયં યક્ષવપુર્દધાના ।
ત્વં નાતિદૂરે સ્વયમાવિરાસીસ્ત્વાં વાસવાદ્યા દદૃશુઃ સુરૌઘાઃ ॥ ૩૨-૩॥

સદ્યઃ કિલાશઙ્ક્યત તૈરિદં કિં માયાઽઽસુરી વેતિ તતો મઘોના ।
અગ્નિર્નિયુક્તો ભવતીમવાપ્તઃ પૃષ્ટસ્ત્વયા કોઽસિ કુતોઽસિ ચેતિ ॥ ૩૨-૪॥

સ ચાહ સર્વૈર્વિદિતોઽગ્નિરસ્મિ મય્યેવ તિષ્ઠત્યખિલં જગચ્ચ ।
શક્નોમિ દગ્ધું સકલં હવિર્ભુઙ્મદ્વીર્યતો દૈત્યગણા જિતાશ્ચ ॥ ૩૨-૫॥

ઇતીરિતા શુષ્કતૃણં ત્વમેકં પુરો નિધાયાત્થ દહૈતદાશુ ।
એવં જ્વલન્નગ્નિરિદં ચ દગ્ધું કુર્વન્ પ્રયત્નં ન શશાક મત્તઃ ॥ ૩૨-૬॥

સ નષ્ટગર્વઃ સહસા નિવૃત્તસ્તતોઽનિલો વજ્રભૃતા નિયુક્તઃ ।
ત્વાં પ્રાપ્તવાનગ્નિવદેવ પૃષ્ટો દેવિ સ્વમાહાત્મ્યવચો બભાષે ॥ ૩૨-૭॥

માં માતરિશ્વાનમવેહિ સર્વે વ્યાપારવન્તો હિ મયૈવ જીવાઃ ।
ન પ્રાણિનઃ સન્તિ મયા વિના ચ ગૃહ્ણામિ સર્વં ચલયામિ વિશ્વમ્ ॥ ૩૨-૮॥

ઇત્યુક્તમાકર્ણ્ય તૃણં તદેવ પ્રદર્શ્ય ચૈતચ્ચલયેત્યભાણીઃ ।
પ્રભઞ્જનસ્તત્સ ચ કર્મ કર્તુમશક્ત એવાસ્તમદો નિવૃત્તઃ ॥ ૩૨-૯॥

અથાતિમાની શતમન્યુરન્તરગ્નિં ચ વાયું ચ હસન્નવાપ ।
ત્વાં યક્ષરૂપાં સહસા તિરોઽભૂઃ સોઽદહ્યતાન્તઃ સ્વલઘુત્વભીત્યા ॥ ૩૨-૧૦॥

અથ શ્રુતાકાશવચોઽનુસારી હ્રીઙ્કારમન્ત્રં સ ચિરાય જપ્ત્વા ।
પશ્યન્નુમાં ત્વાં કરુણાશ્રુનેત્રાં નનામ ભક્ત્યા શિથિલાભિમાનઃ ॥ ૩૨-૧૧॥

જ્ઞાનં પરં ત્વન્મુખતઃ સ લબ્ધ્વા કૃતાઞ્જલિર્નમ્રશિરા નિવૃત્તઃ ।
સર્વામરેભ્યઃ પ્રદદૌ તતસ્તે સર્વં ત્વદિચ્છાવશગં વ્યજાનન્ ॥ ૩૨-૧૨॥

તતઃ સુરા દમ્ભવિમુક્તિમાપુર્ભવન્તુ મર્ત્યાશ્ચ વિનમ્રશીર્ષાઃ ।
અન્યોન્યસાહાય્યકરાશ્ચ સર્વે મા યુદ્ધવાર્તા ભુવનત્રયેઽસ્તુ ॥ ૩૨-૧૩॥

ત્વદિચ્છયા સૂર્યશશાઙ્કવહ્નિવાય્વાદયો દેવિ સુરાઃ સ્વકાનિ ।
કર્માણિ કુર્વન્તિ ન તે સ્વતન્ત્રાસ્તસ્યૈ નમસ્તેઽસ્તુ મહાનુભાવે ॥ ૩૨-૧૪॥

## ૩૩ ત્રયસ્ત્રિંશદશકઃ - ગૌતમકથા

શક્રઃ પુરા જીવગણસ્ય કર્મદોષાત્સમાઃ પઞ્ચદશ ક્ષમાયામ્ ।
વૃષ્ટિં ન ચક્રે ધરણી ચ શુષ્કવાપીતડાગાદિજલાશયાઽઽસીત્ ॥ ૩૩-૧॥

સસ્યાનિ શુષ્કાણિ ખગાન્ મૃગાંશ્ચ ભુક્ત્વાઽપ્યતૃપ્તાઃ ક્ષુધયા તૃષા ચ ।
નિપીડિતા મર્ત્યશવાનિ ચાહો મર્ત્યા અનિષ્ટાન્યપિ ભુઞ્જતે સ્મ ॥ ૩૩-૨॥

ક્ષુધાઽર્દિતાઃ સર્વજના મહાઽઽપદ્વિમુક્તિકામા મિલિતાઃ કદાચિત્ ।
તપોધનં ગૌતમમેત્ય ભક્ત્યા પૃષ્ટા મુનિં સ્વાગમહેતુમૂચુઃ ॥ ૩૩-૩ ॥

વિજ્ઞાય સર્વં મુનિરાટ્ કૃપાલુઃ સમ્પૂજ્ય ગાયત્ર્યભિધાં શિવે ત્વામ્ ।
પ્રસાદ્ય દૃષ્ટ્વા ચ તવૈવ હસ્તાલ્લેભે નવં કામદપાત્રમેકમ્ ॥ ૩૩-૪ ॥

દુકૂલસૌવર્ણવિભૂષણાન્નવસ્ત્રાદિ ગાવો મહિષાદયશ્ચ ।
યદ્યજ્જનૈરીપ્સિતમાશુ તત્તત્તત્પાત્રતો દેવિ સમુદ્બભૂવ ॥ ૩૩-૫ ॥

રોગો ન દૈન્યં ન ભયં ન ચૈવ જના મિથો મોદકરા બભૂવુઃ ।
તે ગૌતમસ્યોગ્રતપઃપ્રભાવમુચ્ચૈર્જગુસ્તાં કરુણાર્દ્રતાં ચ ॥ ૩૩-૬ ॥

એવં સમા દ્વાદશ તત્ર સર્વે નિન્યુઃ કદાચિન્મિલિતેષુ તેષુ ।
શ્રીનારદો દેવિ શશીવ ગાયત્ર્યાશ્ચર્યશક્તિં પ્રગૃણન્નવાપ ॥ ૩૩-૭ ॥

સ પૂજિતસ્તત્ર નિષણ્ણ ઉચ્ચૈર્નિવેદ્ય તાં ગૌતમકીર્તિલક્ષ્મીમ્ ।
સભાસુ શક્રાદિસુરૈઃ પ્રગીતાં જગામ સન્તો જહૃષુઃ કૃતજ્ઞાઃ ॥ ૩૩-૮ ॥

કાલે ધરાં વૃષ્ટિસમૃદ્ધસસ્યાં દૃષ્ટ્વા જના ગૌતમમાનમન્તઃ ।
આપૃચ્છ્ય તે સજ્જનસઙ્ગપૂતા મુદા જવાત્સ્વસ્વગૃહાણિ જગ્મુઃ ॥ ૩૩-૯ ॥

દુઃખાનિ મે સન્તુ યતો મનો મે પ્રતપ્તસઙ્ઘટ્ટિતહેમશોભિ ।
વિશુદ્ધમસ્તુ ત્વયી બદ્ધરાગો ભવાનિ તે દેવિ નમોઽસ્તુ ભૂયઃ ॥ ૩૩-૧૦ ॥

## ૩૪ ચતુસ્ત્રિંશદશકઃ - ગૌતમશાપઃ

સ્વર્વાસિભિર્ગૌતમકીર્ત્તિરુચ્ચૈર્ગીતા સભાસુ ત્રિદશૈઃ સદેતિ ।
આકર્ણ્ય દેવર્ષિમુખાત્કૃતઘ્ના દ્વિજા બભૂવુઃ કિલ સેર્ષ્યચિત્તાઃ ॥ ૩૪-૧ ॥

તૈર્માયયાઽઽસન્નમૃતિઃ કૃતા ગૌઃ સા પ્રેષિતા ગૌતમહોમશાલામ્ ।
અગાન્મુનેર્જુહ્વત એવ વહ્નૌ હુઙ્કારમાત્રેણ પપાત ચોર્વ્યામ્ ॥ ૩૪-૨ ॥

હતા હતા ગૌરિહ ગૌતમેનેત્યુચ્ચૈર્દ્વિજાઃ પ્રોચ્ય મુનિં નિનિન્દુઃ ।
સ ચેદ્ધકોપઃ પ્રલયાનલાભસ્તાન્ રક્તનેત્રઃ પ્રશપન્નુવાચ ॥ ૩૪-૩ ॥

વ્રતેષુ યજ્ઞેષુ નિવૃત્તિશાસ્ત્રેષ્વપિ દ્વિજા વો વિમુખત્વમસ્તુ ।
નિષિદ્ધકર્માચરણે રતાઃ સ્ત સ્ત્રિયઃ પ્રજા વોઽપિ તથા ભવન્તુ ॥ ૩૪-૪ ॥

સત્સઙ્ગમો માઽસ્તુ જગજ્જનન્યાઃ કથામૃતે વો ન રતિઃ ખલુ સ્યાત્ ।

પાષણ્ડકાપાલિકવૃત્તિપાપૈઃ પીડા ભવેદ્વો નરકેષુ નિત્યમ્ ॥ ૩૪-૫॥

ઉક્ત્વૈવમાર્યો મુનિરેત્ય ગાયત્ર્યાખ્યાં કૃપાર્દ્રાં ભવતીં નનામ ।
ત્વમાત્થ દુગ્ધં ભુજગાય દત્તં દાતુઃ સદાઽનર્થદમેવ વિદ્ધિ ॥ ૩૪-૬॥

સદેદૃશી કર્મગતિર્મહર્ષે શાન્તિં ભજ સ્વં તપ એવ રક્ષ ।
મા કુપ્યતામેવમૃષિર્નિશમ્ય મહાનુતાપાર્દ્રમના બભૂવ ॥ ૩૪-૭॥

શપ્તા દ્વિજા વિસ્મૃતવેદમન્ત્રા લબ્ધ્વા વિવેકં મિલિતા મુનિં તમ્ ।
પ્રાપ્તાઃ પ્રસીદેતિ મુહુર્વદન્તો નત્વા ત્રપાનમ્રમુખા અતિષ્ઠન્ ॥ ૩૪-૮॥

કૃપાર્દ્રનેત્રો મુનિરાહ ન સ્યાન્મૃષા વચો મે નરકે વસેત ।
જાયેત વિષ્ણુર્ભુવી કૃષ્ણનામા વન્દેત તં શાપવિમોચનાર્થમ્ ॥ ૩૪-૯॥

સ્વપાપમુક્ત્યર્થમનન્તશક્તિં દેવીં સદા ધ્યાયત ભક્તિપૂતાઃ ।
સર્વત્ર ભૂયાચ્છુભમિત્યુદીર્ય ગાયત્રિ દધ્યૌ ભવતીં મહર્ષિઃ ॥ ૩૪-૧૦॥

મુઞ્ચાનિ મા વાક્શરમન્યચિત્તે કૃતઘ્નતા માઽસ્તુ મમાન્તરઙ્ગે ।
નિન્દાનિ મા સજ્જનમેષ ભીતો ભવાનિ પાપાદ્વરદે નમસ્તે ॥ ૩૪-૧૧॥

## ૩૫ પઞ્ચત્રિંશદશકઃ - અનુગ્રહવૈચિત્ર્યમ્

ભાગ્યોદયે ત્રીણિ ભવન્તિ નૂનં મનુષ્યતા સજ્જનસઙ્ગમશ્ચ ।
ત્વદીયમાહાત્મ્યકથાશ્રુતિશ્ચ યતઃ પુમાંસ્ત્વત્પદભક્તિમેતિ ॥ ૩૫-૧॥

તતઃ પ્રસીદસ્યખિલાર્થકામાન્ ભક્તસ્ય યચ્છસ્યભયં ચ માતઃ ।
ક્ષમાં કૃતાગસ્સુ કરોષિ ચાર્યોરન્યોન્યવૈરં શમયસ્યનીહા ॥ ૩૫-૨॥

દુષ્કીર્તિભીત્યા પૃથયા કુમાર્યા ત્યક્તં તટિન્યાં સુતમર્કલબ્ધમ્ ।
સંપ્રાર્થિતા ત્વં પરિપાલયન્તી પ્રાદર્શયઃ સ્વં કરુણાપ્રવાહમ્ ॥ ૩૫-૩॥

સુતાન્ કુરુક્ષેત્રરણે હતાન્ સ્વાન્ દિદૃક્ષવે માતૃગણાય કૃષ્ણઃ ।
સંપ્રાર્થિતસ્ત્વત્કરુણાભિષિક્તઃ પ્રદર્શ્ય સર્વાન્ સમતોષયચ્ચ ॥ ૩૫-૪॥

વણિક્ સુશીલઃ ખલુ નષ્ટવિત્તો વ્રતં ચરન્ પ્રાઙ્નવરાત્રમાર્યઃ ।
ત્વાં દેવિ સમ્પૂજ્ય દરિદ્રભાવાન્મુક્તઃ ક્રમાદ્વિત્તસમૃદ્ધિમાપ ॥ ૩૫-૫॥

દેવદ્રુહો દેવિ રણે ત્વયૈવ દૈત્યા હતા ગર્હિતધર્મશાસ્ત્રાઃ ।
પ્રહ્લાદમુખ્યાનસુરાન્ સ્વભક્તાન્ દેવાંશ્ચ સન્ત્યક્તરણાનકાર્ષીઃ ॥ ૩૫-૬॥

પુરન્દરે પાપતિરોહિતે તત્સ્થાનાધિરૂઢાન્નહુષાત્સ્મરાર્તાત્ ।
ભીતા શચી ત્વાં પરિપૂજ્ય દૃષ્ટ્વા પતિં ક્રમાદ્ભીતિવિમુક્તિમાપ ॥ ૩૫-૭॥

શપ્તો વસિષ્ઠેન નિમિર્વિદેહો ભૂત્વાઽપિ દેવિ ત્વદનુગ્રહેણ ।
જ્ઞાનં પરં પ્રાપ નિમેઃ પ્રયોગાન્નિમેષિણો જીવગણા ભવન્તિ ॥ ૩૫-૮॥

હા ભાર્ગવા લોભવિકોપચિત્તૈઃ પ્રપીડિતા હૈહયવંશજાતૈઃ ।
હિમાદ્રિમાપ્તા ભવતીં પ્રપૂજ્ય પ્રસાદ્ય ભીતેઃ ખલુ મુક્તિમાપુઃ ॥ ૩૫-૯॥

દસ્રૌ યુવાનાં ચ્યવનં પતિં ચ સમાનરૂપાનભિદૃશ્ય મુગ્ધા ।
સતી સુકન્યા તવ સંસ્મૃતાયા ભક્ત્યા પ્રસાદાત્સ્વપતિં વ્યાજાનાત્ ॥ ૩૫-૧૦॥

સત્યવ્રતો વિપ્રવધૂં પ્રસહ્ય હર્તા નિરસ્તો જનકેન રાજ્યાત્ ।
વસિષ્ઠશપ્તોઽપિ તવ પ્રસાદાદ્રાજ્યેઽભિષિક્તોઽથ દિવં ગતશ્ચ ॥ ૩૫-૧૧॥

હા હા હરિશ્ચન્દ્રનૃપો વિપત્સુ મગ્નઃ શતાક્ષીં પરદેવતાં ત્વામ્ ।
સંસ્મૃત્ય સદ્યઃ સ્વવિપન્નિવૃત્તઃ કારુણ્યતસ્તે સુરલોકમાપ ॥ ૩૫-૧૨॥

અગસ્ત્યપૂજાં પરિગૃહ્ય દેવિ વિભાસિ વિન્ધ્યાદ્રિનિવાસિની ત્વમ્ ।
દ્રક્ષ્યે કદા ત્વાં મમ દેહિ ભક્તિં કારુણ્યમૂર્ત્તે સતતં નમસ્તે ॥ ૩૫-૧૩॥

## ૩૬ ષટ્ત્રિંશદશકઃ - મૂલપ્રકૃતિમહિમા

ત્વમેવ મૂલપ્રકૃતિસ્ત્વમાત્મા ત્વમસ્યરૂપા બહુરૂપિણી ચ ।
દુર્ગા ચ રાધા કમલા ચ સાવિત્ર્યાખ્યા સરસ્વત્યપિ ચ ત્વમેવ ॥ ૩૬-૧॥

દુર્ગા જગદ્દુર્ગતિનાશિની ત્વં શ્રીકૃષ્ણલીલારસિકાઽસિ રાધા ।
શોભાસ્વરૂપાઽસિ ગૃહાદિષુ શ્રીર્વિદ્યાસ્વરૂપાઽસિ સરસ્વતી ચ ॥ ૩૬-૨॥

સરસ્વતી હા ગુરુશાપનષ્ટાં ત્વં યાજ્ઞવલ્ક્યાય દદાથ વિદ્યામ્ ।
ત્વામેવ વાણીકવચં જપન્તઃ પ્રસાધ્ય વિદ્યાં બહવોઽધિજગ્મુઃ ॥ ૩૬-૩॥

ત્વં દેવિ સાવિત્ર્યભિધાં દધાસિ પ્રસાદતસ્તે ખલુ વેદમાતુઃ ।
લેભે નૃપાલોઽશ્વપતિસ્તનૂજાં નામ્ના ચ સાવિત્ર્યભવત્કિલૈષા ॥ ૩૬-૪॥

સા સત્યવન્તં મૃતમાત્મકાન્તમાજીવયન્તી શ્વશુરં વિધાય ।
દૂરીકૃતાન્ધ્યં તનયાનસૂત યમાદ્ગુરોરાપ ચ ધર્મશાસ્ત્રમ્ ॥ ૩૬-૫॥

સ્કન્દસ્ય પત્ની ખલુ બાલકાધિષ્ઠાત્રિ ચ ષષ્ઠીતિ જગત્પ્રસિદ્ધા ।
ત્વં દેવસેના ધનદાઽધનાનામપુત્રિણાં પુત્રસુખં દદાસિ ॥ ૩૬-૬॥

સત્કર્મલબ્ધે તનયે મૃતે તુ પ્રિયવ્રતોઽદૂયત ભક્તવર્યઃ ।
તં જીવયિત્વા મૃતમસ્ય દત્વા સ્વભક્તવાત્સલ્યમદર્શયસ્ત્વમ્ ॥ ૩૬-૭॥

ત્વમેવ ગઙ્ગા તુલસી ધરા ચ સ્વાહા સ્વધા ત્વં સુરભિશ્ચ દેવિ ।
ત્વં દક્ષિણા કૃષ્ણમયી ચ રાધા દધાસિ રાધામયકૃષ્ણતાં ચ ॥ ૩૬-૮॥

ત્વં ગ્રામદેવી નગરાધિદેવી વનાધિદેવી ગૃહદેવતા ચ ।
સમ્પૂજ્યતે ભક્તજનૈશ્ચ યા યા સા સા ત્વમેવાસિ મહાનુભાવે ॥ ૩૬-૯॥

યદ્યચ્છ્રુતં દૃષ્ટમપિ સ્મૃતં ચ તત્તત્ત્વદીયં હિ કલાંશજાલમ્ ।
ન કિઞ્ચનાસ્ત્યેવ શિવે ત્વદન્યદ્ભૂયોઽપિ મૂલપ્રકૃતે નમસ્તે ॥ ૩૬-૧૦॥

## ૩૭ સપ્તત્રિંશદશકઃ - વિષ્ણુમહત્ત્વમ્

પુરા હરિસ્ત્વાં કિલ સાત્ત્વિકેન પ્રસાદયામાસ મખેન દેવિ ।
સુરેષુ તં શ્રેષ્ઠતમં ચકર્થ સ તેન સર્વત્ર બભૂવ પૂજ્યઃ ॥ ૩૭-૧॥

અધર્મવૃદ્ધિશ્ચ યદા ત્રિલોકે ધર્મક્ષયશ્ચાપિ તદા ભવત્યા ।
ધર્મં સમુદ્ધર્તુમધર્મમૃદ્ધં માર્ષ્ટું ચ દેવ્યેષ નિયુજ્યતે હિ ॥ ૩૭-૨॥

સ ઇજ્યતે સર્વત એવ સર્વૈઃ પત્ન્યા ચ ભૂતૈશ્ચ સમં ગિરીશઃ ।
ઇલાવૃતેઽપૂરુષસન્નિધાને સઙ્કર્ષણાખ્યં ભજતે મુરારિમ્ ॥ ૩૭-૩॥

તમેવ ભદ્રશ્રવસો હયાસ્યં ભદ્રાશ્વવર્ષે મુનયઃ સ્તુવન્તિ ।
પ્રહ્લાદ ઉચ્ચૈર્હરિવર્ષવાસી વિશ્વાર્તિશાન્ત્યૈ નૃહરિં ચ નૌતિ ॥ ૩૭-૪॥

શ્રીઃ કેતુમાલે ખલુ કામરૂપં તં રમ્યકે મત્સ્યતનું મનુશ્ચ ।
હિરણ્મયે કૂર્મશરીરભાજં સ્તુવન્તિ નારાયણમર્યમા ચ ॥ ૩૭-૫॥

મહાવરાહં કુરુષૂત્તરેષુ ભૂ રાઘવં કિમ્પુરુષે હનૂમાન્ ।
તં નારદો ભારતવર્ષવર્તી નરં ચ નારાયણમાશ્રયન્તે ॥ ૩૭-૬॥

સત્કર્મભૂમિર્ભરતસ્ય રાજ્યં સન્ત્યત્ર વૈકુણ્ઠકથૈકસક્તાઃ ।
તીર્થાનિ પુણ્યાશ્રમપર્વતાશ્ચ જન્માત્ર દેવાઃ સ્પૃહયન્ત્યજસ્રમ્ ॥ ૩૭-૭॥

પ્રહ્લાદપૌત્રઃ સુતલાધિવાસઃ સુરક્ષિતશ્ચાત્મનિવેદનેન ।
વાર્ધક્યરોગક્લમભીતિમુક્તો મહાબલિર્વામનમેવ નૌતિ ॥ ૩૭-૮॥

સહસ્રશીર્ષઃ શિરસા દધત્ ક્ષ્માં હલી હરેસ્તામસમૂર્તિરાર્યૈઃ ।

સંસ્તૂયમાનઃ સહનાગકન્યઃ પાતાલમૂલે ચ સલીલમાસ્તે ॥ ૩૭-૯॥

વિચિત્રરૂપં જગતાં હિતાય સર્વે સ્તુવન્ત્યચ્યુતમિદ્ધભક્ત્યા ।
એનં કુરુ ત્વં વરદાનદક્ષં માતઃ કૃપાર્દ્રે વરદે નમસ્તે ॥ ૩૭-૧૦॥

## ૩૮ અષ્ટાત્રિંશદશકઃ - ચિત્તશુદ્ધિપ્રાધાન્યમ્

અન્તર્મુખો યઃ સ્વશુભેચ્છયૈવ સ્વયં વિમર્શેન મનોમલાનિ ।
દૃષ્ટ્વા શમાદ્યૈર્ધુનુતે સમૂલં સ ભાગ્યવાન્દેવિ તવ પ્રિયશ્ચ ॥ ૩૮-૧॥

ન વેદશાસ્ત્રાધ્યયનેન તીર્થસંસેવયા દાનતપોવ્રતૈર્વા ।
શુદ્ધિં મનો યાતિ તવ સ્મૃતેસ્તદ્વૈશદ્યમાદર્શવદેતિ માતઃ ॥ ૩૮-૨॥

શુદ્ધિર્ન યજ્ઞેન યજન્ શશાઙ્કઃ પત્નીં ગુરોઃ પ્રાપ ભૃશં સ્મરાર્તઃ ।
શતક્રતુર્ગૌતમધર્મપત્નીમગાદહલ્યાં મદનેષુ વિદ્ધઃ ॥ ૩૮-૩॥

સ વિઘ્નકારી તપસાં મુનીનાં ગતસ્પૃહં યોગિવરં પ્રશાન્તમ્ ।
હા વિશ્વરૂપં પવિના જઘાન ન કિઞ્ચનાકાર્યમધર્મબુદ્ધેઃ ॥ ૩૮-૪॥

મુનિર્વસિષ્ઠઃ ખલુ તીર્થસેવી તપોનિધિર્ગાધિસુતશ્ચ કોપાત્ ।
ઉભૌ મિથઃ શેપતુરાડિભાવં પ્રાપ્તઃ કિલૈકો બકતાં પરશ્ચ ॥ ૩૮-૫॥

ધનાનિ પૃષ્ટાનિ ગુરૂનદાતૄન્ સ્વાન્ ભાર્ગવાન્ પુત્રકલત્રભાજઃ ।
ક્રુદ્ધાઃ પરં હૈહયભૂમિપાલા ન્યપીડયન્ કોઽત્ર વિશુદ્ધચિત્તઃ ॥ ૩૮-૬॥

કુર્યાન્ન કિં લોભહતો મનુષ્યો યુધિષ્ઠિરાદ્યા અપિ ધર્મનિષ્ઠાઃ ।
પિતામહં બન્ધુજનાન્ ગુરૂંશ્ચ રણે નિજઘ્નુઃ ખલુ રાજ્યલોભાત્ ॥ ૩૮-૭॥

કૃષ્ણોપદિષ્ટો જનમેજયસ્તુ શુદ્ધાન્તરઙ્ગઃ પિતરં મખેન ।
પરીક્ષિતં પાપવિમુક્તમાર્યં વિધાય તે પ્રાપયતિસ્મ લોકમ્ ॥ ૩૮-૮॥

સદા સદાચારરતો વિવિક્તે દેશે નિષણ્ણશ્ચરણામ્બુજે તે ।
ધ્યાયન્નજસ્રં નિજવાસના યો નિર્માર્ષ્ટિ સ ત્વન્મયતામુપૈતિ ॥ ૩૮-૯॥

જ્ઞાનં ન ભક્તિર્ન તપો ન યોગબુદ્ધિર્ન મે ચિત્તજયોઽપિ માતઃ ।
અન્ધં તમોઽહં પ્રવિશામિ મૃત્યોઃ સમુદ્ધરેમં વરદે નમસ્તે ॥ ૩૮-૧૦॥

## ૩૯ એકોનચત્વારિંશદશકઃ -  મણિદ્વીપનિવાસિની

સુધાસમુદ્રો જગતાં ત્રયાણાં છત્રીભવન્ મઞ્જુતરઙ્ગફેનઃ ।
સવાલુકાશઙ્ખવિચિત્રરત્નઃ સતારકવ્યોમસમો વિભાતિ ॥ ૩૯-૧॥

તન્મધ્યદેશે વિમલં મણિદ્વીપાખ્યાં પદં દેવિ વિરાજતે તે ।
યદુચ્યતે સંસૃતિનાશકારિ સર્વોત્તરં પાવનપાવનં ચ ॥ ૩૯-૨॥

તત્રાસ્ત્યયોધાતુમયો મનોજ્ઞઃ સાલો મહાસારમયસ્તતશ્ચ ।
એવં ચ તામ્રાદિમયાઃ કિલાષ્ટાદશાતિચિત્રા વરણા લસન્તિ ॥ ૩૯-૩॥

તૈરાવૃતં તે પદમદ્વિતીયં વિભાતિ ચિન્તામણિસદ્મ દેવિ ।
સન્ત્યત્ર સત્સ્તમ્ભસહસ્રરમ્યશૃઙ્ગારમુક્ત્યાદિકમણ્ડપાશ્ચ ॥ ૩૯-૪॥

બ્રહ્માણ્ડકોટીઃ સુખમાવસન્ત ઉપાસકાસ્તે મનુજાઃ સુરાશ્ચ ।
દૈત્યાશ્ચ સિદ્ધાશ્ચ તથેતરે ચ યદન્તતો યાન્તિ પદં તદેતત્ ॥ ૩૯-૫॥

ત્વં મણ્ડપસ્થા બહુશક્તિયુક્તા શૃણોષિ દેવીકલગીતકાનિ ।
જ્ઞાનં વિમુક્તિં ચ દદાસિ લોકરક્ષામજસ્રં કુરુષે ચ દેવિ ॥ ૩૯-૬॥

મઞ્ચોઽસ્તિ ચિન્તામણિગેહતસ્તે બ્રહ્મા હરી રુદ્ર ઇહેશ્વરશ્ચ ।
ખુરા ભવન્ત્યસ્ય સદાશિવસ્તુ વિરાજતે સત્ફલકત્વમાપ્તઃ ॥ ૩૯-૭॥

તસ્યોપરિ શ્રીભુવનેશ્વરિ ત્વં સર્વેશવામાઙ્કતલે નિષણ્ણા ।
ચતુર્ભુજા ભૂષણભૂષિતાઙ્ગી નિર્વ્યાજકારુણ્યવતી વિભાસિ ॥ ૩૯-૮॥

પ્રતિક્ષણં કારયસિ ત્વમિચ્છાજ્ઞાનક્રિયાશક્તિસમન્વિતાઽત્ર ।
ત્રિમૂર્તિભિઃ શક્તિસહસ્રયુક્તા બ્રહ્માણ્ડસર્ગસ્થિતિસંહૃતીશ્ચ ॥ ૩૯-૯॥

સા ત્વં હિ વાચાં મનસોઽપ્યગમ્યા વિચિત્રરૂપાઽસિ સદાઽપ્યરૂપા ।
પુરઃ સતાં સન્નિહિતા કૃપાર્દ્રા સદા મણિદ્વીપનિવાસિની ચ ॥ ૩૯-૧૦॥

માતર્મદન્તઃકરણે નિષણ્ણા વિદ્યામયં માં કુરુ બન્ધમુક્તમ્ ।
બન્ધં ચ મોક્ષં ચ દદાસ્યસક્તા દાસોઽસ્મિ તે દેવિ નમો નમસ્તે ॥ ૩૯-૧૧॥

## ૪૦ ચત્વારિંશદશકઃ -  પ્રાર્થના

આદ્યેતિ વિદ્યેતિ ચ કથ્યતે યા યા ચોદયેદ્બુદ્ધિમુપાસકસ્ય ।
ધ્યાયામિ તામેવ સદાઽપિ સર્વચૈતન્યરૂપાં ભવમોચનીં ત્વામ્ ॥ ૪૦-૧॥

પ્રતિષ્ઠિતાઽન્તઃકરણેઽસ્તુ વાઙ્મે વદામિ સત્યં ન વદામ્યસત્યમ્ ।
સત્યોક્તિરેનં પરિપાતુ માં મે શ્રુતં ચ મા વિસ્મૃતિમેતુ માતઃ ॥ ૪૦-૨॥

તેજસ્વિ મેઽધીતમજસ્રમસ્તુ મા મા પરદ્વેષમતિશ્ચ દેવિ ।
કરોમિ વીર્યાણિ સમં સુહૃદ્ભિર્વિદ્યા પરા સાઽવતુ માં પ્રમાદાત્ ॥ ૪૦-૩॥

ત્વં રક્ષ મે પ્રાણશરીરકર્મજ્ઞાનેન્દ્રિયાન્તઃકરણાનિ દેવિ ।
ભવન્તુ ધર્મા મયિ વૈદિકાસ્તે નિરાકૃતિર્માઽસ્તુ મિથઃ કૃપાર્દ્રે ॥ ૪૦-૪॥

યચ્છ્રૂયતે યત્ખલુ દૃશ્યતે ચ તદસ્તુ ભદ્રં સકલં યજત્રે ।
ત્વાં સંસ્તુવન્નસ્તસમસ્તરોગ આયુઃ શિવે દેવહિતં નયાનિ ॥ ૪૦-૫॥

અવિદ્યમાયાત્વિહ વિશ્વતો મે જ્ઞાનં પ્રસન્ના મમ બુદ્ધિરસ્તુ ।
નાવેવ સિન્ધું દુરિતં સમસ્તં ત્વત્સેવયૈવાતિતરામિ દેવિ ॥ ૪૦-૬॥

ઉર્વારુકં બન્ધનતો યથૈવ તથૈવ મુચ્યેય ચ કર્મપાશાત્ ।
ત્વાં ત્ર્યમ્બકાં કીર્તિમતીં યજેય સન્માર્ગતો માં નય વિશ્વમાતઃ ॥ ૪૦-૭॥

ક્ષીણાયુષો મૃત્યુગતાન્ સ્વશક્ત્યા દીર્ઘાયુષો વીતભયાન્ કરોષિ ।
સઙ્ગચ્છતઃ સંવદતશ્ચ સર્વાન્ પરોપકારૈકરતાન્ કુરુષ્વ ॥ ૪૦-૮॥

મર્ત્યો હ્યહં બાલિશબુદ્ધિરેવ ધર્માનભિજ્ઞોઽપ્યપરાધકૃચ્ચ ।
હા દુર્લભં મે કપિહસ્તપુષ્પસુમાલ્યવચ્છીર્ણમિદં નૃજન્મ ॥ ૪૦-૯॥

યથા પથા વારિ યથા ચ ગૌઃ સ્વં વત્સં તથાઽઽધાવતુ માં મનસ્તે ।
વિશ્વાનિ પાપાનિ વિનાશ્ય મે યદ્ભદ્રં શિવે દેહિ તદાર્તિહન્ત્રિ ॥ ૪૦-૧૦॥

બહૂક્તિભિઃ કિં વિદિતસ્ત્વયાઽહં પુત્રઃ શિશુસ્તે ન ચ વેદ્મિ કિઞ્ચિત્ ।
આગચ્છ પશ્યાનિ મુખારવિન્દં પદામ્બુજાભ્યાં સતતં નમસ્તે ॥ ૪૦-૧૧॥

## ૪૧ એકચત્વારિંશદશકઃ - પ્રણામમ્

દેવિ ત્વદાવાસ્યમિદં ન કિઞ્ચિદ્વસ્તુ ત્વદન્યદ્બહુધેવ ભાસિ ।
દેવાસુરાસૃક્પનરાદિરૂપા વિશ્વાત્મિકે તે સતતં નમોઽસ્તુ ॥ ૪૧-૧॥

ન જન્મ તે કર્મ ચ દેવિ લોકક્ષેમાય જન્માનિ દધાસિ માતઃ ।
કરોષિ કર્માણિ ચ નિસ્પૃહા ત્વં જગદ્વિધાત્ર્યૈ સતતં નમસ્તે ॥ ૪૧-૨॥

તત્ત્વત્પદં યદ્ધ્રુવમારુરુક્ષુઃ પુમાન્ વ્રતી નિશ્ચલદેહચિત્તઃ ।
કરોતિ તીવ્રાણિ તપાંસિ યોગી તસ્યૈ નમસ્તે જગદમ્બિકાયૈ ॥ ૪૧-૩॥

ત્વદાજ્ઞયા વાત્યનિલોઽનલશ્ચ જ્વલત્યુદેતિ દ્યુમણિઃ શશી ચ ।
નિર્જૈર્નિજૈઃ કર્મભિરેવ સર્વે ત્વાં પૂજયન્તે વરદે નમસ્તે ॥ ૪૧-૪॥

ભક્તિર્ન વન્ધ્યા યત એવ દેવિ રાગાદિરોગાભિભવાદ્વિમુક્તાઃ ।
મર્ત્યાદયસ્ત્વત્પદમાપ્નુવન્તિ તસ્યૈ નમસ્તે ભુવનેશિ માતઃ ॥ ૪૧-૫॥

સર્વાત્મના યો ભજતે ત્વદઙ્ઘ્રિં માયા તવામુષ્ય સુખં દદાતિ ।
દુઃખં ચ સા ત્વદ્વિમુખસ્ય દેવિ માયાધિનાથે સતતં નમસ્તે ॥ ૪૧-૬॥

દુઃખં ન દુઃખં ન સુખં સુખં ચ ત્વદ્વિસ્મૃતિર્દુઃખમસહ્યભારમ્ ।
સુખં સદા ત્વત્સ્મરણં મહેશિ લોકાય શં દેહિ નમો નમસ્તે ॥ ૪૧-૭॥

પતન્તુ તે દેવિ કૃપાકટાક્ષાઃ સર્વત્ર ભદ્રાણિ ભવન્તુ નિત્યમ્ ।
સર્વોઽપિ મૃત્યોરમૃતત્વમેતુ નશ્યન્ત્વભદ્રાણિ શિવે નમસ્તે ॥ ૪૧-૮॥

નમો નમસ્તેઽખિલશક્તિયુક્તે નમો નમસ્તે જગતાં વિધાત્રિ ।
નમો નમસ્તે કરુણાર્દ્રચિત્તે નમો નમસ્તે સકલાર્તિહન્ત્રિ ॥ ૪૧-૯॥

દુર્ગે મહાલક્ષ્મિ નમો નમસ્તે ભદ્રે મહાવાણિ નમો નમસ્તે ।
કલ્યાણિ માતઙ્ગિ રમે ભવાનિ સર્વસ્વરૂપે સતતં નમસ્તે ॥ ૪૧-૧૦॥

યત્ કિઞ્ચિદજ્ઞાતવતેહ દેવીનારાયણીયં રચિતં મયેદમ્ ।
અભદ્રનાશાય સતાં હિતાય તવ પ્રસાદાય ચ નિત્યમસ્તુ ॥ ૪૧-૧૧॥

શુભં

Composed by Prof. Paleli Narayanan Namboothiri
The story of Devi and Narayanan and other aspects
of the Bharatheeya wisdom is presented in Devi Narayaneeyam
with 41 Dasakams and 480 verses.

Encoded by Ganga Raamachandran geetanjaliglobalgurukulam at gmail.com
Proofread by Ganga Raamachandran, PSA Easwaran

*Devi Narayaniyam*

pdf was typeset on June 6, 2022

Please send corrections to *sanskrit@cheerful.com*